मन्त्रदीपिकाप्रकाशावतुर्थपंचमाध्यायो

पत्र ३३

4263

मि

श्रीगणेशा० अथ प्रसिद्ध इति तृतीयेमाधिमे सती त्यर्थः प्रयुक्तिः इहमते नानुष्ठापयतोऽस्य
नेन नेत्यनुष्ठानरूपान भावहेतुनासंगतिरित्यर्थः उक्तहेतुनयाऽननुपपत्तिमाशंकाहाशेषि तो वेति
तामेवदर्शयन्नुत्तरत्वेनोत्तरं हि व्याचष्टे यद्यपीत्यादिना प्रयोजकत्वाभावादिति वह्यमाणरीत्यातिशे
षः तथा च सत्यपि शेषशेषित्वे प्रयुक्त्यभावान्न तस्य प्रयुक्तिहेतुतेति भावः। कचित्प्रयुक्त्यभावस्य शेषा
णां विनियोगात्प्रागेव पर्यवसितत्वनिश्चयहेतुत्वाच्छेषशेषित्वाभावे च प्रयुक्तेः क्वाप्यभावादस्ति तस्य त १५
द्धेतुतेत्यरुचिं सूचयन्नित्याह। तथापीति। आमिक्षा हि प्रयोजकत्वादि चिंतानुपपन्ना विधेरेव प्रयोजकत्वा
दिति शंकते। तेन चिंतितिविधावेव प्रयोजकत्वं क्वास्ति केनेति चिंत्यतां अत आह सर्वत्रेति। तदेकेति।
प्रयोजकत्वैकस्वाभाव्यादित्यर्थः। अन्यत इति। प्रधानविधिन एव प्रधानोपकारांगप्रयुक्तिसि
द्धेरित्यर्थः। नहि आमिक्षाविधेः प्रयोजकत्वसिद्धांतो न स्यादित्याह तत्त्वमितियद्यपि सा वैश्वदेव्या
मिक्षेति द्रव्यदेवताविशिष्टप्रधानयागस्यैव विधिः तथापि विशेषणीभूतामिक्षांशे प्रधानविधित्वा

भावादामिक्षादिविधेरंगविधित्वोक्तिर्विशिष्टविध्याक्षिप्तविशेषणविध्यभिप्रायेणावान्तरोक्तिः कस्मैने
त्यनेनतरंवित्यतइतिशेषः। उक्तमेवोदाहरणेनिष्टतयाविहृणोतिकिमित्यादिना। विशिष्टविध्याक्षिप्तः क
पालमात्रगोचरोयोविधिः सकिंपुरोडाशार्थमेककपालंप्रयुंक्ते उततत्षोपकारार्थमपीत्येवमित्यर्थः न
न्वेवमप्यामिक्षादेरेकघंप्रयोजकत्वादिव्यवहारः विधौहिसंयुक्तः तत्राह्यदर्थमितिविधिनिष्टमेवप्र
योजकत्वंतत्रोपचर्येतइतिभावः अनुष्ठापयतीति विधिरितिशेषः। स्वयमितिस्वार्थमित्यर्थः यदर्थोविधिः
स्वविषयंनानुष्ठापयतीतियावत् नत्वंगविधेः स्वविषयानुष्ठापकत्वमेवासिद्धं प्रधानविधिनैवानु
ष्ठानसिद्धेः अतः किमानयनविधिनामिक्षार्थं दध्यानयनमनुष्ठापयतीति वाजिनार्थेवेत्यादिचिंतानु
पपन्नेत्यस्वरसाद्वाहयद्वेति। क्रियायामेतितस्या एव साक्षाद्विधिगोचरत्वादितिभावः। अर्थीहिति
विशेषणाव्यत्तत्रभावेनद्विशिष्टक्रियाया अनिष्पत्तेरितिभावः। एकेतिसप्तमंपदमध्वर्युरंजलि
नागरं स्तोतीति कोमी [redacted]

श्रीरामः ९

यपदस्येत्याकांक्षायां क्रमप्रयुक्तैकहायनीविशेषणमित्यर्थः प्रयोजकाइति नन्वङ्गाणामाक्षिप्तविधी
नामप्रयोगविधित्वात्कथमुक्तास्वरसपरिहारइति चेन्नैवं प्रधानविधिप्रयुक्तत्वेप्ययोगानां सन्निकृष्टत
योगविधिप्रयुक्तत्वस्येवात्याप्यत्वाद्दन्यथा यावत्सागाचाक्रामयेन तावत्साद्गीकृणीया पासमनुस्नुया
दितिवाक्ये यमस्यसोमप्रपूर्वप्रयुक्तत्वमेव स्यान्न तु द्वीकृणीया पूर्वप्रयुक्तत्वमिति भावः नन्वेवं निष्प
न्नेरित्यादिकनिष्पाद्याधिकरणोक्तेव प्रयुक्तिश्चिंत्यते ऽन्यत्र क्रत्वर्थपुरुषार्थत्वादितत्कथं प्रयुक्ति
रध्यायार्थः तत्राह सर्वस्मिन्नेतिक्रत्वर्थत्वे क्रतुप्रयुक्तत्वं पुरुषार्थत्वे पुरुषप्रयुक्तत्वमित्यादि
रूपेण प्रयुक्तिरेवाध्यायार्थ इत्यर्थः प्रतिसेतिनात्र विषयसंशयादिप्रदर्शनीयमिति भावः सूत्रे
तुपुरुषार्थशब्देन प्रयोगोलक्ष्यते प्रायेणापुरुषार्थस्य प्रयोजकत्वात् क्रत्वर्थशब्देनतु नैव प्र
योजकोलक्ष्यते॥ आभाकरात्कृ॥ श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानैः शेषविनि
योगलक्षणमुक्तमिति भाष्यादुपादानात्स्वं श्रुत्यादिव्यतिरिक्तं प्रमाणमस्तीत्यवगमाज्जङ्गम्ये
शेषत्वप्रयुक्तोविकारोस्त्याख्यं चतुष्टयमध्यायार्थ इत्याकृतज्ञमनस्युत्थापयतिपत्नुनरितिभा

शा॰ दी॰ ष्येऽकृत्याहिकीर्त्तनं निवृत्तावेच्छित्र्याद्युपपन्नं नत्र प्रमाणांतरगमकं न हेविच्छ्यं च परैरप्यंगीकार्यमि
त्याशयेन प्रतिबंदीमुद्भावयति अथेति शंकते वक्ष्यति उत्तरमिदमिति। यस्मिन्। वक्ष्यमाणयो
रिति अतः संगतिरिति भावः यस्मिन्कृते प्रीतिरुत्पद्यते स पुरुषार्थ इति सौत्रं लक्षणं तत्र प्रीति
शब्देनेच्छाविषयमात्रोक्तौ क्रत्वर्थेति व्याप्तिः स्वारसिकेच्छाविषयत्वोक्तौ पश्वादिफलकर्मण्य
व्याप्तिः अतः क्रत्वर्थभिन्नत्वघटितमेव पुरुषार्थलक्षणं वक्तुं क्रत्वर्थलक्षणमाह यदिति अ
न्यादिति शास्त्रानपेक्षेच्छाविषयभाव्यकभावनांशत्वे सति क्रत्वर्थभिन्नत्वं पुरुषार्थत्वं तेन ना
धानाध्ययनयोरप्यतिप्रसंगः योरप्यर्थज्ञानयोर्यदाहवनीये जुहोतीत्यादिशास्त्राधीनेच्छावि
षयत्वादिति भावः सूत्रे तु यस्मिन्पदार्थे कृते पुरुषस्य प्रीतिः स्वर्गादि जायते स दर्शपूर्णमासादिः
पुरुषार्थः यत्र तस्य लिंगानुष्ठानमर्थलक्षणं पुरुषार्थस्य प्रीत्याविभक्तत्वादिति विचारशा
स्त्रे लक्षणोक्तिरसंगतेति भाव्यानुक्रमापि वर्णिकांतरमाहाथवेति प्रयोजनं पूर्वपक्षे श्येनफल श्रीरामः
हिंसायाविधेयत्वेन। निषेधाप्रवृत्तिः सिद्धांते तत्प्रवृत्तिः सूत्रे यस्मिन्स्वर्गादौ पुरुषस्य प्रीति २

स्यादितरत्तु भूयतेन स्यादिति स्वार्थत्वहानास्वारसिकी। तियावत्फलस्य ब्रीत्याविभागादिति॥ एवं वा॥
गोदोहनेन गोदोहनपात्रेण किमिति किं क्रतु पुरुषोभयार्थमित्यर्थः फलरूपविशेषणोविधेरत्र
योजकत्वेपि गोदोहनरूपविशेषणे प्रयोजकत्वमित्युत्थानात्संगतिः षष्ठीति संबंधषष्ठ्यापि क
मिसमभिव्याहारात्ते षित्वार्थकत्वमिति भावः क्रत्वर्थमिति यद्यप्युपकारकत्वेन शेषित्वमिति त्व
तीये। स्थितं तथाप्युपकारकमपि प्रयोगविधिस्थादर्थेन गृह्णातीत्यभिमानः सिद्धांतमाह नैव
मिति पुरुषार्थेनापि प्रसंगात्क्रतूपकारसिद्धेः प्रयोगविधिर्गोदोहनं क्रत्वर्थेन यानगृह्णा
तीति भावः विचारमध्यायेन संगमयति इति फलेति॥ एवं वा॥ गोदोहनेन द दिहपुरुषार्थत्वावेदक
श्रुत्यभावात् क्रत्वर्थमेवेति संगतिः। अर्जनस्याकरणत्वान्नियमं वदेदस्यति द्रव्यस्येति तद्गतं द्रव्या
र्जनांगं अतः अर्जनमतं त्रीहित्यस्वांतं त्र्येण पुरुषार्थत्वेनापि नियमस्यार्थवत्वेन शंकामिति भा
वः न यापिक यमर्जनं क्रत्वर्थोग मित्यत उपपादयति स्वरूप इति कार्यो प्रयोगी तिवाच्य इति शे
षः अत्रोमित्यत आह पुरुषार्थत्वे चेति अत्रापि द्रव्यार्जनस्वत्यस्मिन्नुपयुज्यते अर्जनस्य तादर्थ्यं

ल२

शा-टी०

सतीत्यन्वयः तदंगं न स्यात् अर्जनांगं न स्यात् अर्जनाविशेषेति क्रत्वर्थार्जने स्वार्थः एवं चेति सर्वस्याद्र
व्यस्य क्रत्वर्थत्वे सति यस्याहिताग्नेरग्निर्गृहान्दहेत् अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपे
दिति क्षामवतीष्टेरेतामेव निर्वपेद्यस्याहिरण्यं नश्येदित्यादीनां च क्रत्वर्थगृहहिरण्यादिनाशादि
निमित्तेन विधीयमानानां भिन्ने जुहोतीत्यादिवत् क्रतुनैमित्तिकानां गत्योपपत्तेः पृथक्फलं न कल्प्यं
पुरुषार्थत्वे तु तत्कल्प्यमिति गौरवमिति भावः खादिरत्ववदिति यस्य खादिरः स्रुवो भवती
ति विहितं खादिरत्वं खादिरवदित्यर्थः अनुमानेनेति उपायनियममूलत्वानुमानेनेत्यर्थः श्लोकस्थ च
कारार्थं तावदाह रागतित्र्हि क्रतौ विनियुज्यते स्यादित्याह क्रतुरपीति ननु क्रतुः स्वाभिध्यार्थमेव जीव
नेपि नित्योगमनुमन्यत इत्यस्वरसादाह इत्यादि यत्किंचिदंगानुष्ठानस्यैव प्रधानोपक्रमः तेन द्व्या
जनस्यैव दर्शपूर्णमासोपक्रमत्वादप्रवाणेषसुवर्णं लोकाच्छिघजेयाद् दर्शपूर्णमासयाजी सन्नमा श्रीरामः
वास्यां वा पौर्णमास्यां वातिपादयेदित्यनुपक्रमदर्शनेनोपपद्यते इत्यर्थः अनुपक्रमेति अनेनातिपान
येदिति श्रौते पदं व्याख्यातं क्रत्वपूर्वीलहरगोदकल्पनमपि ममन्यस्यादित्याह एवं चेति तदंगमेवे

ति ननु क्रत्वंगं क्रतोरनुपस्थितत्वान्नियम्यमानार्जनस्य पुरुषार्थतया पुरुषस्यैवोपस्थितेरिति भावः
एतेन नियमस्यार्जनोद्देशेन विधानान्न स्यार्जनांगत्वमिति वीहायार्जनस्य क्रत्वर्थत्वे नेत्युक्तं निरस्तं नियमस्य
पुरुषार्थतयैव विधानान्नन्वेवं नियमस्य पुरुषगतादृष्टार्थत्वे त्वदृष्टस्य च प्रत्यवायपरिहारार्थत्वेऽजस्रंश
क्लि प्रतिग्रहीतव्यं स्यात् नन्वेवं प्रतिग्रहसमर्थोऽपि प्रसंगं तत्र वर्जयेदिति निषेधादित्याशंक्य नियमस्य क्र
ममदृष्टार्थ इत्यस्य तात्पर्यमाह नेनेति प्रतिग्रहादिनियमविधेरुपायान्तरप्रतिषेध एव तात्पर्यं न तु तः
किंचिददृष्टमिति भावः केचित्प्राभाकराः मात्रचार्जनव्यावृत्तिः पुरुषार्थस्यापीति नियमार्जितद्रव्य
स्यैव क्रत्वर्थतापन्नेरिति भावः न सिध्येतीति द्रव्यमात्रस्य क्रत्वव्यभिचाराभावादिति भावः तदुपन्यासः
क्रत्वर्थतासिध्युपन्यासः पूर्वपक्षभाष्ये स्थित इति शेषः सोऽपि न स्यादिति पुरुषार्थद्रव्यस्य पूर्वपक्षेऽपि
संभवादिति हेतुरत्राप्यनुषज्यते तथा चाकिंचिद्द्रव्यार्जनेऽकृतेऽपि क्रत्वनुपक्रमदर्शने पूर्वपक्षिणोऽपि सं
भवतीति भावः प्रयोजनं पूर्वपक्षे प्रतिग्रहाद्यर्जितस्यैव क्रतावुपयोगः सिद्धान्ते तु कथंचिदर्जितस्यापि ॥
तद् ॥ तदर्थसंशयमाह नेत्यादि क्रतिशिति प्रतिषेधलेईहैतेति यत्तत्तन्नेति कस्यापि यद्रस्यनलक्ष

यथा २

णेत्यर्थः लक्षणेति अनीक्षणसंकल्पो हि पर्युदासपक्षे विधेयः स चेक्षतिविरोधित्वादीक्षतिधातुना
नञ्भ्यां चोभाभ्यां लक्षणीय इत्यर्थः ननु प्रतिषेधत्वेपि कुतः क्रत्वर्थता तत्राह प्रतिषेधश्चेति स हि वैदि
कत्वसाम्याद्वैदिकीं क्रतुगतामेव प्राप्तिं लब्ध्वा क्रत्वर्थो भवतीत्यर्थः न च विहितस्य प्रतिषेधे विकल्पा
पत्तिः सामान्यविषयस्यापि विधेरुपजीव्यतया विशेषविषयप्रतिषेधेन तुल्यबलत्वादिति वाच्यं इष्ट
त्वादिति भावः पुरुषार्थत्वे फलकल्पनागौरवात् क्रत्वर्थत्वमित्याह फलं चेति तदन्वयबलादिति उप
क्रमश्रुतेन कर्मसामान्येनाकर्मविशेषस्येवापेक्षितत्वात्प्रतिषेधस्य च कर्मविशेषत्वाभावादिति भावः
क्रतौ वैहिरिति क्रतुप्रकरणाम्नानादित्यर्थः एतेन क्रतूपस्थितेः शैघ्र्यं निरस्तं आर्थभावनाक्षिप्तक
र्तुरेव शीघ्रमुपस्थितेः ननु प्रकरणाभावेप्याहवनीयादिवत्क्रत्वर्थता तत्राह श्रुत्यादीति यत्तु फलक
ल्पनादोष इति तत्राह पुरुषेति विधेः साक्षात्पुरुषापेक्षितफलापेक्षत्वस्वारस्यादिति भावः न चास्य श्री एम:
नाश्रुतफलकल्पनापीत्याह तच्चेति एतावता हेत्वसायुक्तो भवतीति एतावतानीक्षणसंकल्पमा
त्रेण एनसापापेनायुक्तो भवतीति वाक्यशेषादित्यर्थः यद्वा एतावता ईक्षणमात्रेण पापयुक्तो भव

नीत्यभ्योसापन्नयः फलं एवं चोद्यं तमिति शान्तृप्रसूयेनाहिंस्योदयस्यानिमित्तलावगमान्निसवद्धा हिंस्यो
दये ऽनौ ह्णासंकल्पः कार्य इति भावः। सूत्रेन स्यात्रीनेत्सर्गेपि इत्याजैनादि वस्तुलाश्रवणोपिप्रज्ञा
पनिवृत्ताहीनि पुरुषार्थानि शास्त्रेण पुरुषार्थलावगमे फलाभावप्रयुक्तशंकानवकाशाच्छास्त्र
फलार्थे लेप्युपन्नामित्याशंक्याह नचेति नचैभिः कर्मभिः फलार्थे द्रव्यं संस्क्रियते फलार्थे द्रव्यसंबं
धोनैषामिति यावत्। अतस्तेनार्थेन पुरुषार्थेन संबंधाद्धनोह्णणादिक्रिया यां पुरुषस्य शेषित्वे
न स्युरिति रित्यर्थः नद्युत्सर्गेपीत्यनेन संगतिः सूचिता॥ ६८॥ स्यादीनिह विहितनप्रधानार्थानि उ
तो हननाद्यर्थान्येवेति संशयमपनेतुं तदर्थं संशयमाह किमिति यथाश्येनवत्प्रनशंकेवलान्नर्थहेतुनेति नप्र
तिषेधः एवमिहापि यज्ञायुधशब्दबलान्नोहननादिसाधनत्वमित्युल्लानात्संगतिः अर्थवत्त्वा
त्रहत्विविशेषकरत्वादित्यर्थः प्रयोजनादिसाधमपुरोरपितुमाह यज्ञेति यज्ञस्यायुधायोगादाह
गोणेति आयुधशब्दः सिद्धांतइव साधनपर इति भावः वैषम्यादिति उत्पन्नाशिष्टत्वेनो सन्निशिष्टपुरो
डाशादेवैषम्यादित्यर्थः एकार्थ्यादिति एकार्थयोस्तु विकल्पेरन्निति द्वारन्यायेनैकार्थानां समु

शा·टी· त्वयासंभवइतिभावः निरपेक्षेति समुच्चयेपरस्परसापेक्षाणामेवसाधनत्वान्निरपेक्षत्वावगमकश्रुतिः
पो ध्येनेतिभावः संभरणविधेकवाक्यतयातत्क्रत्वर्थत्वात्तानुवादानर्थक्यमित्याशंक्याह यत्तायुधा
नीतिसूत्रे स्याद्यर्थःव्याख्यातोशक्तीयस्वस्वपक्षेयह्वीषिभवेयुः अन्यथायज्ञायुधवाक्यानर्थक्यमन्येद्ययत्वेन
मत्यविशेषेणप्रत्ययणोपिप्रकरणात्प्रधानमात्रार्थोनित्यः ।। नेति ।। गृहेकत्वंव्यावर्तयत्युपादेयेतिचतुर्थे
क्षीन्निर्वर्तितीस्यादिप्रातिपदिकार्थसंख्यायाविवक्षितत्वात्तांव्यावर्तयति विभक्तीति अनड्वाहो
ल पुनक्तिकपिंजलानालभेतत्याविद्धत्वबहुत्वेप्यादिशब्दार्थः किमविवक्षिताउतविवक्षितानदर्थ
वोक्तं श्रपहोत्राउनयहोतामितिसंशयद्वयमेकीकृत्याह किमिति स्याद्यैतामपेनोर्ध्वंतीस्यादि
कस्यायथोक्तनवाद्यर्थत्वमेवं एकत्वस्यपदस्यापद्यर्थत्वमितिसंगतिः एवंवा ।। नचायंलिंग
मिति । सत्रंभाष्येपक्षेकत्वाधिकरणरूपंसूत्रतयाव्याख्यायातिदेशाधिकरणत्वेनवर्णिकांतर
मुक्तंतत्राधिकशंकामाह लिंगत्विति शब्दस्येति यथादेशेभक्तिविकाराणांतस्माच्छोनःपुंसीत्या श्रीरामः
दीनांप्रातिपदिकविकाराणांनिसृचनसरइत्यादीनांचेत्यर्थः ।।लिंगादेश्चयोगस्कृगोण इ

तिभावः। आश्रावितात्राश्रावितशब्दार्थमाह अंशेनेति अक्षेण द्वयोरन्यतररूपेणेत्यर्थः एवमाह यज्ञेति
पर पिष्टलेपफलीकरणहोमादिष्वित्यर्थः तद्धर्मा एवेति संस्कारार्था एवेत्यर्थः यथा द्रव्यपरिच्छेदरू
नर पद्रव्यद्वारा लिंगसंख्ययोः साधनत्वमेव मुख्यप्रयाजादीनामपीति संगतिः देवतेति उक्तोदाहरणेषु मे
त्रेण यो देवतोद्देशांशः स यथा यथावद्वर्णमाणतामिष्टानां च देवतानां स्मरणरूपसंस्कारप्रयोजन इ
त्यर्थः अक्ष्यादिति स्विष्टकृदभिप्रायं प्रयोजनं तु सिद्धान्ते स्वाहाकारे अवदानग्रहपूर्वं प्रयुक्ताभिक्रमण
दिधर्मसिद्धिः पशुपुरोडाशे पूर्वप्रयुक्तहविर्योरणमाभिकामितेष्टामिद्धिः स्विष्टकृतेत्यदृष्टसंपाद
नाय यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुरपहरेयुर्वा आज्येन देवताः प्रतिसंख्याय यजेतेति विहिते
नाज्येन स्विष्टकृत्कर्तव्य इति सूत्रे अंशेन परकीयं द्रव्यदेवतसंस्कारकत्वेनाश्रयंतीति। आश्रावयणा
न्तेषु अविशेषेणायजतिद्दानीत्याद्यविशेषेण भागार्थोपूर्वं॥ अर्थे॥ एतदेवेति। प्रयाजकृत्तात्प्रयो
जककृत्वमेवेत्यर्थः कचिदिति दध्यानयनादिष्वित्यर्थः हृत्वेति स्रुवेत्यन्तः परमेत्रावरुण दण्डादिद्रव्या
णां दध्यानयनादिक्रियाणां च स्वार्थे प्रयोजने साम्यमुभयप्रयुक्तिः वैषम्यमित्येकेनैव प्रयुक्ति

5

रित्येतन्मात्रमाक्षिप्तं यिष्यत इति एतेन गोदोहनादिष्वप्रयोजकत्वादि फलकतया चिंतेति लाभात् हेतुर्वोक्ते
ष्यमाणविवेक इति भावः ॥ एक ॥ पूर्वसूत्रोपन्यस्तार्थविचारणात्मसंगतिः । किमामिक्षेति । अर्थान्तरत्वेवि
निगमकाभावादुभयार्थत्वे सत्युभयप्रयोज्यत्वे पयस एवामिक्षात्वे तन्मात्रार्थता ॥ दध्यानयनस्यामिक्षा
योगमात्रप्रयोज्यत्वमिति फलफलिभावः । अत्र दध्नश्चामिक्षात्वेपि वाजिनयागप्रयुक्ताभावेन तस्या
स्ततोर्थान्तरत्वस्य प्रकृतानुपयोगेपि अष्टमे आमिक्षायाः वक्ष्यमाणप्राप्तदोहविकारत्वसिद्ध्यर्थेन
दित्यदोषः । दधिसंसृष्टमिति दधिसंस्कृतमित्यर्थः । अर्थान्तरमिति तथा च वाजिनतुल्यतानेच्छेति ।
सर्वनाम्नः प्रकृतपयसः परामर्शोन्नार्थान्तरमिति वाच्यं स्त्रीलिंगानुपपत्त्याश्चैवेयथज्योतिरितिव
त्वक्ष्यमाणपरत्वादिति भावः । आमिक्षायाः संयुक्तं विहितमिति सन्वयः । मेदतिसेति तत्पदेन तद्यो:
आस्तामिति । तदपि स्वपक्षे नवपयस्त्वमित्यादिना प्रपादयिष्यत इति भावः । कर्मणाहिक्षाव्याप्यमाने
संस्क्रियमाणेन वाजिनेति तेन तत्र वाजिनयागात्मकवाजिनापचारेणन दध्यानयनेन वाजिनं संपा
द्यमिति प्रयोजनमिति भावः । तत्र पुनर्द्रव्यप्रयुक्ताभावाद्वाजिनयागलोपो न्यायात्याप्तः परन्तु यस्य श्री एपः

स्ववीर्योऽतिवचनादाज्येन तद्यागा इति सूत्रे एकस्मादृध्वानयनादुभयोर्निर्वृत्तेः सर्वमामिक्षावाजि
नेवदृध्वानयनप्रयुक्तो समं स्यादिति ॥ षष्ठ्याः षडिति। उत्तरवेदिदेशो उपरवदेशो वा सोमक्रयः नैवे
शे प्राग्वंशात्सोमक्रयिणी नयनं धर्मसंस्पाः पदान्यनु निष्क्रामति यत्र सा पदं निदधाति तत्रैवा ध्व
र्युरपि पदं निदध्यादिति यावत् पदं पदं पांसून् गृह्णीयादाह विधिनिहार्षेर्धो नारस्य आक्रकरेने न पदेन पांसु
मिश्रिति यावत्। कथं शिति पदपांसुसाध्य सहा भ्यंजनं तस्य सोमक्रयस्येत्यर्थः। वा सेचा साधवणादिति ह
नु दृध्वानयनवे षम्यार्थत्वेन व्याकुर्वीत तन्न एवं संगतिं सूचयन् श्लोकं व्याचष्टे दृध्वानयनमिति
सिद्धं नयतिने वमिति नयः नयनं परार्थत्वात् क्रयार्थत्वात् तदकमपि पदं पांसुसाध्य सहाभ्यंजनेन तु मं.४
पदकर्मणोऽपि नयनं तत्प्रयोज्यं स्यात्तत्राह परार्थेति नयनस्य प्रसंगादिजनन साधनपांसुग्रहणोप —
कारकतामात्रेणासंबंधेऽपि पदकर्मवामध्यानि राकांक्षत्वान्नयनस्य तादर्थ्ये प्रमाणाभावान्न तेनाप्र
योज्यते इत्यर्थः नतिनितितयनं त्वित्यर्थः पदकर्मनिकटेप्रयोजनं न पूर्वपक्षे समअपहस्य योगिणा प्रस व२
पेयांसुलाभाय पुनर्नयनं कार्यमिति सिद्धान्ते तु पांसवसेराणा भ्यंजनं ननु वाः जिनयागवल्लोपो न्याय्यः।

शा.दी.

पांसुद्रव्यस्य वाजिनवत्प्रयुक्तत्वाभावात् किंतु तत्संस्कारस्यैव नयनं नश्यतः तथात्वादतः संस्कार
लोपेपि केवलपांसुभिरंजनमिति ॥ अथ ॥ एवं वैषम्यात्प्रसंगतिं संचयन्नुपेक्षमाह नत्वेति । नेह के
वलं कपालमुपवापे विधीयते पुरोडाशपदवैयर्थ्यापातात् । किंतु पुरोडाशार्थत्वेनावगतं नं चैवं विनियु
क्तविनियोगापत्तिः लक्षणया पुरोडाशार्थत्वाधिष्ठानस्य स्वरूपेणाविनियोगात् नं चैवमपि केव
लविधानादविशेषः यतः पुरोडाशार्थत्वमुपधानव्यार्थसंबंधप्रतानानंतरं तदधिष्ठानस्य लक्षणा
यत्वेन उपवापे विनियोगात्प्रागेव पुरोडाशार्थत्वज्ञानावश्यंभावेन पुरोडाशप्रयुक्तिमुपजीव
ति तुषोपवापेन स्वयं प्रयुक्ते प्रयुक्तस्य पुनः प्रयोगायोगादिति सिद्धांतमाह सत्यमिति प्रयोजनं पूर्व
पक्षे च तुषोपिकपालं संपाद्यं सिद्धांते तु षोपवापः कपालप्रयोजकत्वाभावात् सत्यं न कार्यः न च तल्लोप
एव गुणलोपे पि मुख्यस्येति न्यायेन तत्स्थानमुख्यस्य संभवात् सूत्रे त्वर्थेन पुरोडाशलक्षणेन प्रयोज श्री एम्र:
नेन सह विधीयमानेन कपालाश्रयत्वसाधनं केवलं तुषोपवापाख्यप्रयोजकं न च कथं कपालस्य
पुरोडाशसंबंधः संभवति तदभावादिति वाच्यं भविष्यतापि पुरोडाशेन तदुद्देशेनासाधनमात्रात्संबं

6

घोपपन्नेस्तस्य च संबंधस्य पुरोडाशनिमित्तकत्वान्न द्व्यर्थस्यैव सतः कपालस्य तु घोपपन्नापे विधा
नेन पुरोडाशप्रयुक्तत्वात्कपालस्य ॥ पृशा ॥ उभयत्रेति यथा द्रध्यानयनस्य पयः संबंधित्वेन
श्रुतत्वात्तयोरुपामिक्षार्थत्वं एवं पशोर्हृदयाद्यिषु श्रवणात्तन्मात्रार्थत्वमित्याशयः एतेन कपाल
स्य पुरोडाशे श्रुतस्य तु घोपयत्नायेति विनियोगाद्युक्तं पुरोडाशमात्रप्रयुक्तत्वे हेतुर्न तु हृदयादिमात्र प्र ६४
युक्तत्वे तत्संबंधित्वेन श्रुतस्यान्यत्रापि विनियोगादिति संगतिः सूचिता प्रयोजनं पूर्वपक्षे ह
दयाद्यर्थविशसनस्य शाखदाद्युपचारेतरद्व्यर्थस्यांतरसंपाद्य ॥ सिद्धांते नेति स्तत्रैयर्थ्यो विषये लोहि
२१५ तं ह्रतोरकर्मत्वं च प्रयोजकत्वं न तद्व्यर्थपश्वनालंभात् ॥ एकदेश । सर्वप्रदानाधिकरणन्यायेन
हृतस्य पुरोडाशस्यान्याद्यर्थत्यागास्य त्कस्य पुनरन्यस्मै त्यागायोगात्पुरोडाशांतरं संपाद्य
न स्योत्तराधोस्विष्टकृद्यष्टव्य इति पूर्वपक्षयति नाश्नीति एतेन पूर्वत्र हृदयाद्यर्थस्य पशोः शाखृ
दाद्यहणासंभवात्तस्याप्रयोजकत्वेपीह प्रकृतपुरोडाशात्तराद्ग्रहणासंभवात्स्विष्टकृतः प्र
योजकत्वमिति संगतिः सूचिता विद्यमानशेषस्य प्रतिपत्त्यपेक्षत्वाच्च प्रकृतसंबंध एव न्याय्य

शा॰ दी॰

इत्याशयेनाह प्रतिपत्तिरत्वा चेति सूत्रे एकदेशद्रव्यकंशिष्टकृदादिप्रयोजककर्मोत्पत्तिदशायामेव वि
द्यमाने नाग्नेयपुरोडाशादिना संबंधात्॥ अभि॥ कृत्स्नयवाइति। आग्नेये ह्याग्नाइयइत्यर्थः। ब्रह्मेति
ब्रह्मसामकाल इत्यर्थः। प्रकृतावितिः दर्शपूर्णमासयोरित्यर्थः। प्राशमिति। चोदकप्राप्तं पुरस्येति भा
वः। व्याहृतत्वादिति। आज्यभागादाविति शाबुः। उत्तरेणेति। नधारयितुं व्योतः पात्रान्तरं नोत्साद्य
मित्यर्थः द्वितीयेति। अनेनयथापूर्वत्रोत्तरार्द्धादिशाद्गबलात्प्रकृतन यद्धर्णं तथेहापि द्वितीयाविभ
क्तिबलाद्धविः संस्कारत्वमिति संगतिः सूचिता। अभ्यर्हितइति। उपयुक्तसंस्कारउत्पन्नस्योत्प
त्स्यपूर्वस्याविधायाधानउपसृज्यतेउपयोक्ष्यमाणसंस्कारस्तु अपूर्वोत्पत्त्यावच्छेउपयुज्यतइत्यर्थः
तथेति। उपयोक्ष्यमाणानीत्यर्थः। इष्टेति। स्तुवारित्केकिरणरूपेत्यर्थः। अनपेक्षितइति। उपस्त
रणादेः संस्कारस्य सत्वादितिभावः। दृष्टलाभादेगविभक्तिव्यत्ययः स्वीकार्य इत्याह अतइति न
न्वेवं प्रयाजशेषस्य एकस्मिन्हविष्यपि प्रतिपत्तिसिद्धेः सर्वेषांहविषामभिघारणं न स्यात्तच्च
न्यथाग्राजापत्यहविषामपि स्यात् इत्याशंक्य आधारनियमबलादार्थिकविधिनाहविः संस्का

श्री एम्॰

रस्यापि स्वीकारात्प्रतिप्रधानं गुणावृत्तिन्यायेन सर्वहविष्षु संस्कारसिद्धेर्नियमस्य चात्रानियम
प्रसक्तावेवग्रहणेनैरनियमस्य च प्रयाजानेनरकृतेव्याज्यभागद्व्यासमर्गार्थसन्निहितेध्रुवप्रस
क्तेरसन्निहितानांप्राजापत्यहविषांनियमविषयत्वाभावेनसन्निहितसर्वहविःसंस्कारोनियमफ
लमित्याशयेनाह हविराधारेति सकृदवाकवदिति। सकृद्वाक्काले नप्रस्तरयागोयथा ॥ इष्टदेव
तायाःस्मरणेन इव्यस्य प्रतिपत्त्यासंस्कारः एवमाधारेहविषांप्रयाजशेषस्य च संस्कार इत्यर्थः।
यच्चिति। प्राभाकर इत्यर्थः अनेनेति। ध्रौवाज्यस्याज्यभागार्थं उपयोगप्रमाणत्वहेतुना प्रथम ५६
मभिधारणासमर्थेनाडुपयोगप्रमाणाहविःसंस्कारत्वं अयशश्शार्थिकमात्त्र बहूभिधारणागम्य
त इत्यर्थः। किंच। हविषांसंस्कार्यत्वाभावे प्रयाजशेषंप्रतिगुणत्वमेव स्यान्न च तत्संभव इत्याह
प्रधानेति। सत्यपि गुणत्वेतद्गतसंख्यानविवक्षिता। उपादेयगतसंख्याया एवविवक्षितत्वाद्धाह
विषां च प्रधानार्थमुपात्तानां पुनरुपादानायोगादिति भावः। सत्रेयथापृशोत्रनूयाजार्थेष्टहा
ज्यधारणार्थपात्रभेदस्तथा प्राजापत्यवपाभिधारणनिमित्तेनतदर्थपात्रभेदस्यादिति। समाप्ते

८

श्रा॰ दी॰ हार्येति। बहुवचनांतद्दृष्टशाद्वृक्तृतीयप्रयाजवचनस्तृतीयप्रयाजमिष्ट्वा हविरादव्य चतुर्थप्रयाजोप
क्रमकालेउपभृतिविद्यमानमाज्यं जुह्वां समानयन इत्यर्थः प्रयाजार्थमिति। चतुर्थोत्तमप्रयाजहव्या
र्थमित्यर्थः सिद्धांतस्तु तं प्रयाजत्रयस्य जोहवचतुर्गृहीतेनानुष्ठानादिति भावः। अनूयाजार्थमि
ति। पूर्वपक्षे प्रयाजेषु जोहवोपभृतयोर्वैकल्पिकत्वात्तज्जोहवाभावपक्षे औपभृतचतुर्गृहीतं हव्यं
तगीतेकचतुर्गृहीतेन सर्वप्रयाजानां प्रागेवानुष्ठेयत्वेन तदर्थं समानयनस्यापि प्रागेव जातत्
लादुपभृति प्रयाजार्थाज्यस्याभावात्तेन च जुह्वां समानीतेन प्रयाजेषु क्रियमाणेषु इष्टौ
यात्तरकाले अस्य समानयनस्य विधानादस्यानुयाजार्थं हि तोयचतुर्गृहीतसंस्कारार्थत्वा
दिति भावः। तत्र यदि प्रयाजार्थं समानयनं तदा यद्वाज्येन प्रयाजहव्यापत्र्छानेन तत्समानयनद्वार
कं स्यात्तत्र प्रयाजोत्स्वकीयपात्रप्रयुंजानो समानयनद्वारा प्रयुंजोपात्तामिति द्वारभूतं तत्समा श्रीरामः
नयनं। आज्यनष्टमांगां प्रयोजकं यदि चानुयाजार्थं तदा परप्रयुक्तद्रव्यसंस्कारत्वात् प्रयाजकाभिति
फलफलिभावः। ननु प्रयाजहव्यार्थं क्रियमाणं समानयनं तदर्थमेव न्याय्यमतः कथं पूर्वपक्ष

इत्याशंक्याभवेदेवं यदि चतुर्थोत्तमप्रयाजद्वयमात्रार्थमौपभृतं स्यात् न त्वेवमित्याह सर्वार्थमिति प्र
याजार्थं यद्राज्यं तत्सर्वं प्रयाजार्थमिति योजना ॥ अविशेषादिति प्रयाजानूयाजेभ्य इति औपभृतवि
नियोजकवाक्ये चतुर्थोत्तमस्य विशेषाश्रवणादित्यर्थः ॥ बहुश्रुतेरिति प्रयाजानूयाजेभ्य इति बहु २५
वचनस्य प्रयाजेषु पंचसु बंगादित्यर्थः ॥ अस्तु सर्वार्थं ततः किमित्यत आह समं दाधितिप्रयाजशब्दो
ति सुबंतस्यैव समासविधानात् प्रयाजशब्दे सुविभक्त्यपेक्षायां अतेव सानुषज्जनीयेति भावः ॥ अनूया
जपदस्य त्रिशब्दो ति सुबंतस्यैव समासविधानात् प्रयाज... क्रैस्येति ॥ अनेन यथाभिघारणास्य परप्रयु
क्तद्रव्यसंस्कारत्वात् प्रयोजकत्वमेवं समानयनस्येति संगतिः सूचिता ननु चतुर्गृहीतं वा एतदभू
त्तस्याघारमाघार्य त्रिः शिः प्राचीनं प्रयाजान्यजती त्याघप्रयाजेष्वयुक्तजौहवचतुर्गृहीतत्वाव
रुद्धत्वादौपभृतस्यार्वाक् द्वियाथ्यत्वमेवेत्यत आह उभयार्थमिति यज्जुह्वां गृह्णातीति प्रयाजेभ्यस्तदि
त्यविशेषेण विनियोगात् जौहवमपि सर्वप्रयाजार्थमेव त्रिः शिः प्राचीनमिति वाक्यं तु ॥ अवयुत्या
नुवादेन उपयन्नं नामि द्वाते पित द्विधाप्रकं समानयनकालविधिपर एव जौहवस्याघत्रयार्थत्वप्रा

श्रा·टी· भ्रारिति सिद्धांतेन वहूयमानत्वादिति भावः। आज्यमेवेति जुहूवहोमस्याविधानात्तस्य च समानयनेनैवि
नानुपपन्नेरिति भावः। अदृष्टार्थमिति· अनुयाजानां तदानेनुष्ठानादिति भावः। क्षारणमिति करि
ष्यमाणानुयाजाज्यसंस्कारार्थं तदेकदेशस्य क्षारणमित्यर्थः। प्रयोजनं पूर्वपक्षं उपभृतियत्व
याजार्थं तत्सर्वादौ समानीयवऊहि: प्रयाजकाले अनूयाजार्थस्य जुह्वां किंचित्क्षारणं कदाचि
नु जोहवेनैव पंचापिप्रयाजाश्चापि वर्हि:काले किंचित्क्षारणं सिद्धं तेन तु जोहवेन त्रीनिष्ठान् औपभृ
तेन हाविति सूत्रे समानयनमौपभृतप्रयोजकं स्यात् आनिध्यौपाचतुर्गृहीतान्याज्यानि न स्यत्रा
नूयाजान्यक्ष्यन्भवतीति चतुर्गृहीतवऊ लिंगात् हि जौपभृतयोः प्रयोजेष समुच्चये घटतेइतर हवौ ५
थाजौहवौपभृतयोरन्यतरस्य प्रयाजार्थं एकं चतुर्गृहीतं ध्रुवायामपरमिति च चतुर्गृहीतद्वयमेव स्यात्
एवं च समुच्चये सति समानयनस्यापरितनप्रयाजद्वयार्थत्वात्प्रयोजकत्वमिति॥ ॥तत्र॥ समा श्रीएमः
नयनस्य परकीयद्रव्यसंस्कारत्वाभावात्प्रयोजकत्वं यदुक्तं तदनुपपन्नं जौहवौपभृतयोर्भागेण
प्रयाजेषु वैकल्पिकत्वेन यदौपभृतेन प्रयाजास्तदा सर्वदा वैवप्रयाजार्थौपभृते नैकदेशस्य जुह्वां

समानेयत्रयाचतुर्थप्रयाजोपक्रमसमयेउपभृतिप्रयाजार्थाज्याभावेनपरकीयद्रव्यस्येवतद्दा
समानयनमितिसमानयनस्यप्रयोजकत्वाभावादितिऔपभृतंकेवलानूयाजार्थमयानत्वयुक्तमे
वेतिसमानयनस्यप्रयोजकत्वासंभवादितिवापूर्वोक्षेपात्संगतिः।उत्तरत्रावितिनिर्विशेषसंयोगा
त्प्रकरणेनसर्वार्थतेत्यर्थः।चतुर्जोहवस्ययावत्प्रकरणेनसर्वार्थताकल्प्यतेततःप्रागेवप्रत्यक्ष
वचनेनैनेएकोक्ष्यान्नकल्पनावकाशइत्याशंक्याह यदीति·प्रसज्यतइतिनैवेतन्निरूढिनेष्यते
औपभृतस्यप्रयाजानुयाजार्थत्वादितिभावः।वचइति प्रयाजवाक्यमनूयाजवाक्यंचेत्यर्थःन
चोभयार्थवाक्यप्राप्तत्वात्कथमनूयाजवाक्यस्यअर्थवत्त्वमितिवाच्यम्।उभयार्थवाक्येनोपभृतस्यो
भयार्थत्वप्राप्तावपिकेवलानूयाजार्थत्वस्याप्राप्त्यानूयाजवाक्यस्यकेवलानूयाजार्थत्वविधित्वे
नार्थवत्त्वसंभवादेवंचऔपभृतंकदाचिदुभयार्थंकदाचित्केवलानूयाजार्थमितिविकल्पएवसि
द्धोयपूर्वपक्षेबोध्यः।आगसेति·उभयार्थत्वेयद्यौपभृतस्यपाक्षिकंस्यात्तदाकदाचिज्जौहवेने
वपंचप्रयाजाःस्युरितिजौहवंचतुर्थांशमयोर्विकल्पितेस्यात्तथाचतुर्जुह्वांगृह्णातिप्रयाज

म्यस्त्वदिति वा संत्रिषाघे पुनि संजोहवं विषन्नत्र्यं स्याद्यो लक्षणिकल्पेनेति विधिवैरूप्यं स्यात्तस्माद्धोप
भृतस्य नित्यमेगोभयार्थत्वं वाच्यमिसनूयाजवाक्यस्य केवलानूयाजार्थत्वविधित्वासंभवादग
तिकत्वमितिभावः। सत्रे तत्त्वज्जो हवाघाज्येउसन्निः कार्यविशेषासंयुक्तातत्तः सर्वार्थता स्यात्। ता
दा। श्रोपभ्रताज्यस्य संगात्संगतिः लक्षतेति। अष्टसंख्यायाः चतुः संख्याद्वयाविनाभावादि
तिभावः। ननु प्रयाजानूयाजयोश्चतुर्गृहीतावत्तद्वलोके यमष्टसंख्याविधिस्तत्राह चतुर्गृही
तमिति सामान्येति चतुर्गृहीतवाक्यस्यानारभ्यवादत्वेन सर्वहोमविषयत्वात् प्रयाजानूयाज
व्यतिरिक्तविषयं तद्वाक्यमितिभावः। भिन्नविषयत्वाभिप्रायं श्लोकं मत्वाशंकते नन्विति श्लोक
तात्पर्यमाविष्करोति उच्यत इति अंगांगस्य प्रधानोपयोगित्वेपि अंगगुणविरोधाधिकरणन्या
येन भाष्यकारोक्तगुणमुख्यव्यतिक्रमाधिकरणन्यायेन च बाध्यत्वादितिभावः। अशक्कुवंती श्रीरामः
तितनश्वग्रहणाद्दारान होमपर्यन्तधावनक्रमेतिभावः। नहि ग्रहण एवपर्यवस्यतत्त्राह ग्रहणमा
त्रेति चतुः संख्याद्वयेति लक्षणया चतुः संख्याकग्रहणद्वयविधानार्थेत्यर्थः। वस्त्कृतस्कृतेनात्र

नह्यविशेषतस्संख्यायाश्च नारभ्यवादेनैव प्राप्तेर्ग्रहणस्य च होमान्यथानुपपत्त्यैव प्राप्तेः आज्यं गृह्णा
तीति वचनाद्ग्रहणप्राप्तिरिति केचित्। तथा चाष्टसंख्यया चतुःसंख्याछ्यं कल्पयित्वापि चतुर्गृही
तद्वयं तदुपभृतीति चतुर्गृहीतद्वयस्यापि एकपात्रतामात्रं विधीयते नैव योजनं पूर्वपक्षेव ग्रहणप्रयासे
पृषदाज्यवरुणे स्विष्टकृदर्थं यजति नात्र रेक्रियत इति अनूयाजाभावे प्यष्टगृहीतं सिद्धं तेनानूया
जाभावे चतुर्गृहीतं सत्त्वेन तद्ध्येयमत्राज्यं॥ ॥इति श्रीचंपकनाथविरचिते शास्त्रदीपिकाव्याख्या
ने प्रकाशाख्याने चतुर्थाध्यायस्य प्रथमः पादः॥ १ ॥श्रीजानकीवल्लभो विजयते॥ ॥स्वरूपे
पूर्वे पादे साक्षाद्यागसाधनद्रव्यविचारः प्रयोजकत्वविचारः इह पारंपर्येण तत्साधनस्वरूपदेशितिपादि पदानाद स्वरूपा
तत्त्वमानं तर्थे चेत्याह। पृथक्करिष्यन्त इति तन्त्रस्येति शेषः। गृहीतव्य इति तत्तत्स्वच्छेदनादीना
मप्रयोजक इति शेषः। करणेति कर्तव्यताविरहे स्वकर्मकभावनाया विध्ययोगाद्विनियोगाभावे
नह्युत्पत्त्यनर्थकं चवारयितुं तस्याश्चेत्याद्युक्तिः स्वरूपादानापादानविधिं संभावयितुं त्वनेन वा
मनेत्याद्युक्तिः [illegible] सोत्र पदस्यैवानर्थः यद्यप्यत्रापि स्वहकर्मकत्वे स्वरूपहस्तापेक्षत्वादाकांक्षा ना

शा·दी

पि स्वरूपस्य करोत्यर्थ भावनाया ऽछेदकसमर्पणेन विशेषावगतिमात्रहेतुतया विधेयां तदाऽसमर्पक
त्वात्करोति रूपग्रहणत्यर्थस्यैव विधिरिति भावः। अंजन साधनत्वं गतिस्वरूपणापत्सु मनक्तीति यः प्रथ
मः शाकलः प्रतिपन्नेतत्स्वरूपं कार्य इति चतवाक्यार्थपर्यालोचनया ज्ञानसाधनशाकलविशेषः स्वरूप श
ब्दार्थ इत्यवगतस्येत्यर्थः। यूपादिति यूपापादानकत्वविधानादित्यर्थः। यूपशब्देनेति यूपशब्दे न स्वार्थ
संबंधात् स्वदिराख्यकाष्ठस्य जोषणादीनां चोपस्थितेर्योग्यतया करणत्वेनैमित्तिकमेव्यक्तात्वेन चा
न्वय इति भावः। एवं च यूपस्य स्वार्थजोषणादाविव स्वरोरपि स्वार्थे स्वादिराख्यकाष्ठजोषणादिक्रिया
प्रयोजकत्वमित्याह इतीति। जघन्यस्येति न च करोतेः प्राधान्यात्तल्लक्षणापत्तेरिति वाच्यं धा
त्वर्थस्य काष्ठजोरकत्वेन क्रियालाभावात्प्राधान्यासिद्धेरिति भावः। अत्र निष्पन्नस्येति यूप
र्थछेदनानन्तरनिष्पन्नशाकलोपादानात्तत्त्वाशकेन विच्छकलेनांजनं न तु स्वर्थं पुनस्तक्ष श्रीराम:
णादिप्रयुक्तिरित्यर्थः। सूत्रे स्वरूपं यदाच्छत्थकानिष्पन्नः यूपस्य स्वरूपं करोतीति स्वरूपक्रियावि
धायकशब्दसत्वात्॥ ॥शाखा॥ ॥यूपशब्दवत्प्राचीशब्दस्यापि न लक्षणेत्युक्तं नांसंग

तिशिति सूचयन्नाह श्रुत्येति यथाश्रुतं हृषयन्नु सिद्धान्तयति आइहते व्येति हि शास्त्राहेतु
मशक्यत्वादिति भावः। पूर्वपक्षी स्वाभिप्रायं शंकते अथेति। नचावधेर्लाभः विहार
देशस्यावधित्वात्। एवं च प्राचीदिग्ग्रहणं गतत्वात्तत्र युक्तेति भावः। ननु विशेष्यालो
भात्साकांक्षत्वमित्याशंक्य शाखामाहरतीति समानविभक्तिकशाखापदसत्वात्तद्ग्रह
णस्य पूर्वपक्षेऽपि समत्वान्न दोष इत्याशयेनाह प्रकृतेति एवं च प्राच्या दिशः शाखा वि
शेषणत्वात् शाखाप्रयुक्तैव दिक् सूत्रे प्राचीशब्दः शाखाया स्यात्तत्र स्यात् प्रकृतत्वेन प्रा
चीशब्दस्य तत्संबन्धात्॥ शाखायाः॥ प्राच्या दिशः केवलशाखाप्रयोज्यत्वेऽपि छेदनादी
न्४ नां केवलायप्रयोज्यत्वमिति संगतिं परिवास्य छित्वाऽपाकरोति माद्धुंसंकाशास्त्रे अथ क्रू
रो तिकिं मूलार्थमपोति मूलार्थत्वे तद्धारणत्कार्यार्थत्वात्प्रयुक्ति फलतीति भावः। समूलस्य
स्प२ स्येत्येतिशेषः। ननु शाखामाच्छिनत्तीत्यादौ शाखाशब्दस्य समूलत्वाविवक्षेऽपि मूलतः शाखामि
त्यत्र नतथात्वं मूलस्य मूलापादानकपरिवासेनायोगादित्यत्राह परिवावैसनं चेति। नसेःस

शा॰ ० वीविभक्तिकत्वाद्द्वितीयार्थत्वान्मूलाग्रयोर्द्वयोरपि ग्राह्यत्वादिति भावः मूलापादानत्वाभि
तिप्रयोगप्राचुर्यादपादानस्योपश्लिष्टत्वाच्चापादानार्थस्तसिरिति भावः। ननु तथापि मूलच्छेदना
देः प्रयोजनं कं केन स्यात्तत्राह तेष्विति शेषत्वेति। नन्वेवं समूलाग्रस्येत्याह रणादिनस्यात्तत्राह समू
लस्येति न चेति तत्र स्वपरित्वोसमनविशेषणं मूलमपि तद्वारा उपवेषकरणार्थमिति भावः। वा सम्
योगादिति उपवेषमिति द्वितीयानपरित्वासनमपेक्ष्य किंतु करोतिमपेक्ष्येति भावः निराकांक्षी
क्रियते इति ननु स्वकरणाकांक्षावशादपि न मूलस्योपवेषार्थत्वं शंकेतेति भावः। वस्तुतस्तु
करोतेरादानार्थकत्वे नोपवेषस्य भाव्यत्वमेव नास्तीति करणाकांक्षापि नास्तीति तत्स्वस्व रू
पदेवाप्रयोजकत्वं तस्य स्याहकरोतिस्थेति। ननु मूलस्योपवेषार्थत्वं एकवाक्यसंयोगो न तथा
र्थत्व इत्याशंक्या निराह नचेति प्रयोजनं पूर्वपक्षे उपवेषनाशे पुनः शाखाहरणे व्यानथा पौर्णमास्या 18
दावपि शाखाहरणे व्याप्ति इति तूभयत्रापि नाहरणे व्यानत स्वोपवेषाभावादेवेनकेनचित्काष्ठेनक
पालोपधानं मन्त्रे शाखायाः शाखाप्रधानेमूलतः शाखायापरित्वास्येति वाक्ये उपवेषेणपरित्वासन

विभागोसंबंधः स्याद्वितीयया याज्यानुवाक्यायाः प्राधान्यावगमात्करोति क्रियायै क्षत्वे न उपवेष स्यात्तदेव
स्यात् ॥ हरणे ॥ कौशीमात्स्याहिस्यु शाखानाह तेव्ये स्यसृक्तंकपालोपधानार्थं तेह्नाहरणेपि प्रस्त
रस्य प्रहरणार्थं तत्राहरणात्वश्यंभावादिति पूर्वपक्षे योजनाक्षेपात्तु संगतिः प्रस्तरेण सहशाखायाः प्र
हरणस्य पूर्वपक्षेऽभिमतार्थकर्मत्वसिध्यर्थं प्रस्तरप्रहरणस्य तत्तीयाध्यायोक्तं होमत्वं स्मार
यति यागइतियागयुक्तप्रक्षेपरूपो होम इत्यर्थः । एवमध्येपि मां मंत्रवर्णोक्ते सूक्तवाकप्रमि
पाद्याग्न्यादीनां प्रहरणे देवतात्वं [illegible] सूक्तवाकस्य प्रहरणकरणत्वानुपपत्त्यातन्यतिपाद्याग्न्या
दीनां तत्र देवतात्वेऽन्य देवतासंबंधाद्यागो हरतिरित्यर्थः । तुल्यवत्त्वादिति सहशब्देन तुल्यत्वावगमा
दित्यर्थः । ननु सूक्तवाकवाक्ये प्रहरणमात्रश्रवणात् यागाप्रतीतेर्न प्रस्तरस्य तत्साधनत्वं येन शाखाया
अपि न तस्य तत्राहृतिर्वापिवक्ताते यो ब्रह्मवर्चसकामः स्यात्तस्माएतं सोमारौद्रं चरुं निर्वपेदिति वि
हिते सोमारौद्रयागे यागविधिपरतिषाद्यापौर्णमासेन निर्वपेदित्यादौ श्रुतेनिर्वापाद्दिशा हविर्दिस्यर्थः । सो
मंचरुं निर्वपेदिति तु नेदृशं तेन तत्र द्रव्यदेवतासंबंधाद्यागकल्पनेनातिदिशिके निर्वापानुवादो

शा०द्वि०

गीकारादिति ध्येयं। नावयागादिति। सूक्तवाकवाक्येन तथावगमादितिभावः। इव्येति द्रव्याणां कर्मसंयो
गपृणात्वेनाभिसंबंध इति षष्ठाद्य प्रथमपादन्यायेन शाखादेर्व्यस्य प्रहरतिक्रियार्थत्वात्प्रहरणमर्थ
कर्मैवेत्यर्थः। शाखावाक्ये यागकल्पने प्रमाणाभावादुक्तिः प्रहरणमात्रार्थे इत्याशयेनाह यागइति
सेति शाखाप्रिप्रतिपाद्येत्यर्थः। ननु सूक्तवाकप्रस्तावे शाखाप्रस्तरयोः सहप्रसंगे प्रहरणे मांत्र
वर्णिकदेवतान्वयाविशेषाच्छाखाप्रहरणे होमः स्यादित्यत आह नचेति शाखेति मंत्रे यद्देने न हविषेति प्र
स्तरस्यैव प्रकाशयत्वात्तस्यैव प्रहरणे होमत्वं साधनं शाखाप्रहरणेत्वार्थसमाजमात्रमिति न शाखा
यादेवता संबंध इति भावः। ननु सह शाखयेति तृतीयया शाखायां गुणता प्रतीतिरित्यत आह यथेति
एतावदिति। एतावत्याधिकरणतात्पर्यं स्थितमित्यर्थः। प्रयोजनं पूर्वपक्षे उद्देश्यागेदं शाखा
याअपि निर्देशः सिद्धांते स्यादिति प्रस्तरमात्रस्येति प्रयोजनांतरं तु संगतोदर्शितं सूत्रे तु प्रहरणेपि
होम एव स्यात् सहशब्दे ननु होतिसाधनप्रस्तरेणायोगसामान्यावगमात् द्रव्याणामर्थं क्रियांप्रति शे
षत्वात्॥ उक्त॥ मंत्रवर्णार्थत्वेनोपसंत्रोहि [illegible] ने राकांक्षणानियन प्रयोजनान्वयः नचेहनये

श्री रामः

ति पूर्वपक्षसौकर्यार्थमाह प्रयोजनेति शास्त्रस्याप्युपयुक्तत्वात्प्रतिपत्तिः नचेह संयवनोपयु
क्तानामपां निनयने किं तु तदुपयुक्तावशिष्टानामिति संगतिमभिप्रेत्य पूर्वपक्षयति तत्रेति सि
द्धान्तयति तदुच्यत इति प्रयोजनेन पूर्वपक्षे संयवनानंतरं निनयनात्सर्वेऽप्रणीतानाशेषु न कृत्स्ना
यः पत्रं च संयवनाभावस्तत्रापि निनयनाच्छेमायः प्रणीतापां सिद्धानेनेति । सूत्रे चाज्यवत्त्वौ वाज्य
स्येवत्र नेकत्र विभज्य विनियोगः ॥ ॥ प्रास॥ ॥ इंडेति । इंडेअस्मी क्षयती स्यनेनेति शेषः । इंडङ्खी
क्षायास्तद्धारणरूपत्वादिति भावः । दृष्टांतसंगतिः प्रक्षिप्यत इति प्रक्षेपेणाप्रतिपाद्यत इत्यर्थः
द्वितीयात्विति इंडउ स्योप्सिततमत्वेनेनचान्यस्याभिधेयमाणयोगादिति भावः । अथेति इहद्रव्य
त्यागेनं तास्यर्थेन स्याणीप्सितद्वितीयातोऽसंत्तजघन्यत्वात् किं तु सत्कुष्वप्येवमेवाणीप्सितद्विती
याप्रपत्ते किमिति व्यत्ययः स्वीकृतः इत्यत्र तात्पर्यं परिहरति तत्रेति ततश्च तत्र साधनत्वत्रत्यपा
र्थत्वे तृतीयार्थे द्वितीयेति व्यत्ययः । इह तु कर्मार्थे च द्वितीयाप्रपद्यत इति न व्यत्ययः इत्यर्थः उपयुक्त
स्येति ७प पोक्ष्यमाणसंस्कारस्य कार्ये निष्पत्त्युपयोगित्वादशेषयत्नसुप्रयुक्तं संस्कारस्याहुति

शा॰दी॰ प्यन्न कार्यं नितशयाधानमात्रार्थत्वाल्लगरीयस्त्वमितिभावः। ननु दंडस्याकोणीकरत्वात्तत्प्रतिपत्ति
दृष्टार्थत्वं मैत्रावरुणार्थत्वेन दृष्टार्थत्वं स्यादित्यत आह प्रभुणस्कारितिप्रयोजकमिति तत्र सूत्रे यानु
वचनात्सर्वदंडनाशेपुनस्तत्प्रयुक्तिः फलतीतिभावः। प्रयोजनान्तरमाह इत्यग्नीषोमीयेति। उत्त॥
इडास्विष्टकृदादिचेतिचतुर्धाकरणांशयुवाककालभक्षादिरादिपदार्थः। अनेन प्रासनग्रहणमुप
लक्षणमितिसूचितं। अर्थकर्मप्रतिपत्तित्वविचारसमाप्यनेनतरं प्रतिपत्तेरेवासंभावितत्वात्कथम
र्थकर्मत्वप्रतिपत्तित्वविचारस्तस्याना संगतिः। आकोणीकरं संकोणीकरमित्यतो यत्र देशविवि
क्तेनार्थप्रतिपत्तिमपेक्षेतेत्यर्थः। ननु निहन्ते परमापूर्वरूपार्थसंस्कारो न स्यादित्युक्तं तत्राह अपेक्षि
ततयेतिनह्यो येप्रतिपत्तिलोपे विपद्यते कार्यं क्रमेन भवति। प्रतिपत्तिजनितातिशयेन तु तस्य मेभ
वतीत्यर्थः। सूत्रे उत्पत्तिसमवाययद्येन संयुक्तं तत्तदर्थमेव तत्वादर्थ्यस्य श्रुतिप्रमाणकत्वात्तस्यो श्री॰राम॰
त्पत्तिसंयुक्तं कार्योपयुक्तत्वादर्थान्तरसंबंधे तदर्थान्तरं प्रतिपत्तिः स्यादिति। अत्रोत्पत्तिग्रहणमु
पलक्षणार्थं अन्यत्र कृतार्थानामन्यत्र गमनं प्रतिपत्तिरित्येव लक्षणे अन्यथात्प्रणीतानय

नाहेरप्रतिपत्तिलापत्तेः सोमि॥ पूर्वोक्तप्रतिपत्तिलक्षणस्यातिव्याप्तिमाशंक्य निराकरणात्संे
ने गतिः हविर्दृतिल्ततीयार्थसाधनत्वस्य प्रकारान्तरेण संभवाद्वचनबलाच्च तत्रापि शिष्टप्रयोग
शबरहोपि ट्व्यांतरविधिरिति भावः तस्यतोलिव चूनं प्रतिपत्तिविधानेन सावकाशमिति भावः अ
त्येनमिति श्रतो तिप्रत्ययार्थभावनायांधात्वर्थस्य उद्देश्यत्वेन विधेयत्वेन वा संबंधाभावादिति भावः
देशत्वात्तासु प्रक्षेप्तव्या नो त्यर्थः देशमिति कृत्यर्थविधिलाभाल्लक्षणान्नदुष्टेति भावः आद्यायेति
सहार्थत्ततीयेति भावः तानीति अश्ववभृथेन चरेलोत्ययामवभृथधात्वर्थोपानमित्यन्वयः सत्र
सोमिकेवभृथे सोमलिप्तेन सह यानं प्रतिपत्तिः स्यात्तस्य कृतार्थत्वात्॥ कर्त॥ अवभृथदेशप्र
संगाद्देशस्य तत्समानन्यायत्वात्कालकर्तृसोमादेरपि बुद्धिस्थत्वात्संगतिः क्वचिदिति क्वचित्
योगद्रव्यार्थः प्रथमं द्रव्याचेतिनियमेनाभप्राप्तावेवेतरनिवृत्त्यर्थत्वात्तस्यादिति भावः॥ तथा॥ अस्या
निर्देशिकत्वात्सिद्धि शेषाशंकामाह गुणानामिति नतार्थ्यं नेति साधनत्वानवगमादेव क्रियया पक्षे
प्यनाक्षेपान्न नियमसंभवइत्यर्थः। पक्षेप्यप्राप्तो कथमनुवादस्तत्राह द्रव्येति नक्रियेतितनस्वद्

शा·दी· व्यस्तरूपार्थस्याप्रात्यानियमोऽनर्थकः स्यादिति भावः सिद्धान्तयति अप्रसत्यपीति तत्स्वविशेषणस्या
प्यर्थोऽक्रियार्थविधानान्नानर्थक्यमिति भावः। सूत्रे द्रव्यगुणश्रुतिरपि न नियमविधिः ३ सत्याक्रि
यासाधकेन द्रव्येणात्मपरिच्छेदकतया संयोगात्॥ संस्काराः तंडुलान् क्षिपतीति पुरोडाशार्थं क्षिप्ततंडुलाक्षि
प्तत्वार्थेः व्रीहीनवहन्तीत्यत्र यागवाचकशब्दाभावेऽपि प्रकरणबलादेव यागसाधनं लक्षयित्वा तत्र
विनियुक्तस्यावघातादेर्यागांगत्वमस्त्येवेति परिहारः स्पष्टत्वादुपेक्षितः। संस्कारेऽपि श्रुतिनीतौ वा
दः नियमप्रधानकविधिसंभवादिति सूत्रार्थः॥ यज्ञ॥ यजतिचोदनाद्द्रव्यदेवताक्रियमभिधत्ते
समुदाये यज्ञेः कृतप्रत्ययादिति सूत्रार्थः प्रतीयते स चायुक्तः लोके क्रियायामेव प्रसिद्धेः स
मुदाये प्रसिद्ध्यभावात्तथाप्येवं तो हि पदार्थं इदं समर्थ्ययोरिव द्रव्यस्य देवतायाः क्रियायाश्च प्रतीतौ स
यज्ञेश्चेति मत्वाभिप्रायमाह देवतेति प्रतिग्रहरहितत्वे सति द्रव्योद्देशत्वेन चोदितत्वं देवतात्व
यजतेरिति चोदनास्य यजतिनाभिधानयोगे यजतिना चोदनानभिधानात् न तत्स्वदेवताश श्री रामः
ब्दार्थेन गतेस्त्वचोदनांश त्र्यपाधिरेव न तु यज्ञस्यार्थ इति ध्येयं हितोपसूत्रे त्र्यासेचनाधिकोपागो

15

जुहोतिहोमःस्यात्तदुक्तंयजत्यभिहितेत्रासेवनाधिकेनजुहोतिश्रवणाद्यथाचतुर्होत्रायाजये
च्चतुर्गृहीतमाज्यंगृहीत्वाचतुर्होतारंव्याचक्षीतपूर्वेणग्रहेणार्धंजुहुयादुत्तरेणार्धमितिइदं
चसूत्रंयथाश्रुतमयुक्तंमारुतानुजुहोतीतिकठिनद्व्योणजुहोतिर्देशेनतत्रासेचनाभावादित्या
शंक्यासेवनंप्रक्षेपोपलक्षणार्थमितिव्याचष्टेसएवेतियागहोमकथनमुपलक्षणमित्याशये
नाहस्वीयस्येतिएवंचेतिअनुष्ठानकथनपरत्वेइत्यर्थःयद्देशोनेरप्रथमसूत्रंयजतिचोदनेत्य
नत्संगतिंसूत्रयन्त्रवतारयतितत्रेतिद्रव्यदेवताक्रियमितिक्रियाशब्दःसंबंधपरःएकस्येतिसूत्र
स्येतिशेषःतदुक्तमितिसूत्रस्यणतनिकामाहयजत्यभिहितइतिप्रक्षेपमात्रमितिचतुरवत्तवा
क्येहोमानुवादेननचतुरवत्तविधीयतेयेनयागचोदनयाहोमस्याप्राप्तेरनुवादासंभवाज्जुहोति
श्रवणमनुपपन्नंस्यात्किंतुद्यवदानादिवाक्यप्राप्तचतुरवत्तानुवादेनप्राप्तप्रक्षेपविधिस्त
तश्चसंप्रतिविधीयमानप्रक्षेपांशाधिकायागेपिजुहोतिश्रवणमुपपद्यतइत्यर्थः।प्रक्षेपेति
नेनसर्वोव्याख्यानेप्रथमसूत्रेऽनुष्ठापयतिमाह्कल्पनाद्वितीयसूत्रेजुहोतिनातन्प्रयोगस्य

शा॰दी॰ लक्षणीयत्वाच्चानांजनं प्रचितं विधेः यथा प्रसिद्धचतुरवत्तानुवादेन प्रक्षेपविधिरेवमिति हा
पियच्छब्दयोगात्प्रसिद्धातिथ्यासंबंधस्यास्यैव बर्हिष उपसत्स्वपि बोमोप संबंधविधिर्वाच्यः तत
श्च बर्हिस्साधारण्यविधेरसंबद्धार्थतया बर्हिषः संप्रति विधीयमानत्वे प्रसिद्धातिथ्यासंबंधस्यान्य
त्र विध्ययोगान्न बर्हिः साधारण्यविधिरित्याच्छिद्यविधानाद्यन्यतमपक्षएवास्थेयः इति प्रत्य
वस्थानात्संगतिः निरिष्टकेति निःशेषमिष्टं यस्यानवाप्त्यन्यत्रोपयुक्तमिति यावत्तत्पाठान्तरे नि
ष्क्रांतमिष्टाविधिरिति निरिष्टकं आच्छिद्यति आतिथ्यायां बर्हिर्विधिस्तत्र स्याम हृष्टार्थं बर्हिरु
पादानेकार्यमिति तत्तावन्मात्राभिधायकमिति भावः निरिष्टकविधिरिति यच्चातिथ्यायां ह
विरासादनोपयुक्तस्यैव बर्हिष उपसदादौ वचनाच्छिन्नयोगइत्यर्थः। बर्हिर्धर्मोत्र्यत्वाति
आतिथ्याप्रकरणाम्नातानामपि वासेन प्रकरणबाधात्सर्वार्थत्वमिति भावः। अत्रोपसदां
अपूर्वत्वेन तदंगतया बर्हिषः प्राप्त्यभावेपि बर्हिस्तद्धर्माणामंगप्रधानसाधारण्यात् उपसदंग श्री रामः
त्वेनाविहितस्याबाधप्रसंगार्थत्वेन बर्हिः प्राप्तिरिति न तत्त्वविंतानुपपत्तिरिति ध्येयं। आच्छिद्यविधाने

बर्हिरुपादानमातिथ्यायां प्रयुक्तं तेन तद्देवातिथ्यायामनुष्ठेयं इतरेतु संस्कारा उपसदग्नीषोमीयप्र
युक्ताः इति तत्रैव तदनुष्ठानं हृत्वा हविरासादनादिकं तस्मिन्बर्हिषि कार्यं निशिष्टं कोपदेशेनत्वाति
थ्यायां कृतं हविरासादनादिकार्यं स्यापि बर्हिष उपसदग्नीषोमीयोधारणार्थं प्रयुंजानेतस्य चोप
सदग्नीषोमीययोरप्युपादानव्यतिरिक्ताः संस्काराः कार्याः पूर्वसंस्काराणामातिथ्याकार्या
र्थत्वेनोपयोगिदुपात्तस्योपादानापेक्षान्यमात्रं नकार्यं धर्मातिदेशेनत्वयाणामपि पृथक्प्रयो
जकत्वात्त्रिष्वप्यन्यस्य द्राश्वबालादिधर्मकं बर्हिः कार्यं सिद्धान्तेन तु सर्वप्रयुक्तमेकमिति त्रिष्वप्य
कमेव बर्हिरिति लक्षणसंगतिः प्रयोजनं च सर्वत्रैविधेः विधिगम्यातिथ्यासंबंधस्य तत्तत्कर्मोपयु
योगित्वादर्थान्तरे उपसदादौ विधिप्रदेशः आतिथ्याविहितधर्मातिदेशः स्यात्॥ ॥इति श्री
चपकृतायां शास्त्रदीपिकाप्रकाशे चतुर्थाध्यायस्य द्वितीयः पादः २ श्रीरामाय नमः
इव्य॥ ॥क्रतुप्रयुक्तिः पादद्वये चिंतिता इदानीं फलप्रयुक्तिश्चिंत्यत इति पादान्तरत्वं आनंतर्यं
तत्र यावतः क्रत्वर्थपुरुषार्थयोः शिति सर्वे पुरुषार्थस्य चरमोपादानात्। एवंजातीयकस्येति

प्र० टी०

कर्मिसंबंधरहितस्येत्यर्थः। अभिचरन्यजेतेत्यादौ तु अभिचरस्य कर्तृविशेषणत्वेन हि शिष्टकर्तृ
विशिष्टक्रियाविधौ गौरवात्फलविशेषणत्वेन फलत्वमिति बोध्यं। क्रत्वनुप्रयोगेति। अस्यानारभ्याधीत
त्वादिति भावः। रात्रीति ये प्रतिष्ठामेतातिते रात्रिमुपयन्तीति विपरिणामवदित्यर्थः। तदुपेक्ष्येति साधना
शमुपेक्ष्येत्यर्थः। लोक इति। यश्चौषधं पिबति स उल्लाघो भवतीत्यादावित्यर्थः। निराकांक्षत्वादिति रा
त्रिसत्रे तु साकांक्षत्वादिति परिणाम इति भावः। न चेति पर्णतयेत्या क्रियात्वेन स्वयं फलसाधनत्वाहाः प्र
यापेक्षत्वादिति भावः। ननु जुहूपदेनैव लक्षितो जुहूसंबंधिव्यापार आश्रयोस्तु तत्राह। न त्वत्रा
नेति पर्णताया संबंधस्य पर्णत्वफलसंबंधस्य च बोधनाद्वाक्यभेद इत्यर्थः। सूत्रे प्रपस्य पर्णमयी
ति इष्वयं यदाङ्ग इति संस्कारे यत्र प्रयाजानूयाजा इति कर्मणि च। नेमि॥ बार्हद्गिरमिति बार्हद्गिरस्य
साम साधनकं ब्रह्मसाम स्तोत्रं कुर्यादित्यर्थः। उपादानमिति। एवं च फलार्थत्वेपि क्रत्वर्थत्वात्सूत्र
त्वादेः फलश्रुतिरर्थवाद इत्युक्तमयुक्तमित्युत्थानासंगतिः। ननु वारणोयज्ञावचरः अभिवर्तो ब्र श्रीरामः
ह्मसाममिति वारणाभीवर्ताभ्यां नित्यविधेर्निराकांक्षत्वान्न परिणयादेर्नित्यार्थत्वमत आह॥ अथ

वेति। सामान्येति। धारणास्य प्रणयनवदितरसाधारण्येन यत्तत्साधनत्वमात्रश्रवणाद्दर्भीवर्ते
स्यापि कर्मविशेषादर्शनादरेणाश्रुतस्य ब्रह्मदृशाहदितरसकलकर्मसाधारण्यादित्यर्थः। अभीव
र्तेविषये ह्यीदृशाहमात्रविषयत्वाभ्युपगमेन तु ब्राह्मणत्वदितरप्रयोगविषयत्वतया साधारण्येन चैवं
वाहेन्द्रिं ब्राह्मणस्य ब्रह्मसामकयोस्ताधुरंधरान्यस्यप्रयोवाजीयवेष्णस्येति ब्राह्मणाश्रयो
गत्वयस्यापि नैमित्तिकावहत्वादभीवर्तस्यासिद्धान्ते निर्विषयत्वापत्तावस्य ब्रह्मदृशाहविष
यत्वेन संभवतीति वाच्यं निर्विषयत्वापत्तेरेव। नैमित्तिके ऽपि विकल्पाश्रयणादिति भावः। न च
चमसेनापः प्रणयेदिति विशेषतोऽपि प्रणयने पात्रविधिरस्तीति वाच्यं। चमसशब्दस्ये स्या
कारविशेषमात्रवाचित्वेन तस्य मन्त्रयविरोधित्वाभावान्मन्त्रयस्यापि तदाकारसंभवादि
ति एवं च चमसाविरोधिमन्त्रयकांस्यादिकमेवास्मिन् पक्षे उदाहरणं न तु गोदोहनादि केन
५२ स्य विशेषविहितचमसविरोधित्वात्सर्वो ऽपि पक्ष ईदृग्युदाहरणाच्चे स्तमवचनाद्दर्शितेन ह्रत्वा
विंतयाचापूर्वपक्षस्य गोदोहनेपि संभवात्तत्सिद्धान्तयति ब्राह्मणे नेति सन्निधिमात्रस्येति मात्रचा

 18

एक॥१

आकांक्षादिव्यावृत्तिः सत्रे नैमित्तिके दृष्टफलक्षणे काम्ये च समानैर्न तोन्यदिति। पयआदौ त्व
र्थः। एकवाक्यतां दर्शयति दध्नेन्द्रियमिति। काम्यमेवेति। वाक्यद्वये प्रीतिशेषः। तत्तो नित्यं त्वनु
वादेयमिति भावः। ननु एवं ज्योतिष्टोमप्रकरणे पशुकाम उक्थ्यं गृह्णीयादिति फलार्थत्वेनो
क्थ्यसंस्थाविधेर्यद्युक्थ्याग्रहत्यतः स्यात्तु उक्थ्यस्वरूपप्रदर्शकवाक्यापेक्षा न स्यात्तथा द्वाद
शाहप्रकरणे प्रजाकामो व्यूढच्छन्दसा द्वादशाहेन यजेत सोमसे कामः समस्तच्छन्दसा इति फलार्थेन यो
व्यूढविधेरैन्द्रवायवग्राहाग्रेण प्रायणीयादिनो योग्यघटेरपां दशानामन्हामैन्द्रवायवाग्रत्वप्रथमम ह
रथपशुकाम उपमध्ये आयपणाग्रग्रहे चैन्द्रवायवाग्रम् अथ षष्ठे पशुकाये आयाय्य पणाग्रम् अथ हुऐन्द्रवा
यवाग्र इति व्यूढस्वरूपप्रदर्शकवाक्यापेक्षापि न स्यादित्याशंका उक्थ्यव्यूढयोरलौकिक
त्वात्तत्स्वरूपप्रदर्शकापेक्षा न दध्नस्त्वाह दधिस्वरूपमिति सूत्रे एकस्योभयार्थत्वे संयोगस्य वि
नियोजकवाक्यस्य पृथक्त्वे कारणं॥इव्या॥ कोपेक्षा नैयवागूराजन्यस्यामिक्षा वैश्यस्ये ||प्री एम:
त्यादिग्रहार्थः। किमिति किं क्रतुपुरुषार्थमुत केवलपुरुषार्थमिति तात्पर्ये सिद्धान्ते पिक्षोद्द

णस्येति षष्ठीश्रुत्या पुरुषधर्मत्वस्यावगमेऽपवाच्यतया केवलक्रत्वर्थत्वाभावात्। ननु पुरुषसंयो
गेऽपि जंजभ्यमानो ब्रूयात् मदेऽपि दक्षक्रतुः इति जंजभ्यमानमंत्रवचनस्येव प्रकरणात् क्रत्वर्थता
स्यात् अत आह व्रतस्येति तत्र फलकल्पनाभिया क्रत्वनुप्रवेशो नेहेत्यर्थः। ननु तत्रापि नियमस्य
फलं कल्प्यं तत्राह नत्यलेति व्रतसामर्थ्याल्लब्धपुरुषगतफलेत्यर्थः। ततश्चान्येन तद्गतफलमे
जेयत्वस्य चैतीति कल्प्यत इति भावः। तथा च पूर्ववदिह क्रत्वर्थसंयोगाभावात् इह क्रत्वर्थेते
ति संगतिः। प्रकरणपरिग्रहेऽपि ब्राह्मणस्येति पुरुषसंयोगोपपन्नेने प्रकरणबाधो युक्त इत्याश
येनाह कल्पनीय इति सत्त्वेऽपि योग्यतया व्यापारांक्रियार्थीनां पुरुषकारणसंस्कार इति क्रत्वर्थता॥
वोद॥ व्रतवदेव फलाश्रवणाद्धि स्वाजिदादेरपि न फलार्थत्वमिति संगतिः। तदात्वे मस्काले वा
सत्यामुत्तरकाले प्राभाकरमतेऽशंकते अथ सत्यपीतिकस्येति कस्यायामविषयकं कार्यमित्य
र्थः। फलकामस्येति तत्र च फलकामनियोज्यत्वे फलरागादेव तत्प्रवृत्तिसिद्धौ न नियोग
स्य प्रयुक्तिशक्तिकल्पनाकृतं गौरवमिति भावः। नन्वर्थेति। प्रवृत्तिगोचरस्येव हननस्याति

शा॰ दी॰ षेध्यत्वात्प्रवृत्तिरपि न प्रत्यवेत्यैतेनेति भावः । प्रयुक्तौ । इति यदिह प्रयुक्तिर्लाघवप्राप्त्यर्थस्य फल
कामोऽनियोज्यः प्रकृते कल्प्येत तत्र हि निषेधेष्वपि फलकाम एव नियोज्यः कल्प्येतेति भावः । नक
र्थंचित् । इति धात्वर्थस्याप्रकृतार्थत्वादिति भावः । सत्येव प्रतीयते विधीयते ॥ तत्र । नानेकेति सर्व
पदाध्याहारेणानेकेषां फलानां प्रयुक्तिशक्तिकल्पनायां गौरवमिति भावः । सत्येव नादेशात्फ
लविशेषानिर्देशात् । सत्त्व । अप्रामाण्येऽवेत्यनास्थावादः सर्वार्थत्वेऽपि प्रामाण्योपपत्तेः स्वर्ग
इति यद्यप्यनतिशयप्रीतिर्मोक्ष एव तथापि पश्वादिषु सापेक्षयाविशेषकथनमात्रेणास्यैव भू
योविषयत्वं बहुपुरुषविषयत्वं । क्रतौ ॥ तस्मादिति विश्वजिन्न्यायादित्यर्थः ॥ सिद्धान्तयतीति नि
वि र्देशात्त्विति विनश्यते परिणम्यते नु हवत्परिणामादिवदित्यर्थः । विनाशो विपरिणामः । स्वरूप श्रीरामः
रिणामः । स्वरूपमिति स्वरूपेणावस्थितिरित्यर्थः । सत्यक्रतौ रात्रिसत्रादिके फलश्रुतिप्रणीता
द्रावं गर्दवफलार्थेवाहनं कामोजिनिर्मन्यते । काम्ये । विधिः प्रत्ययः सामान्यरूपेण प्रवर्तना र्म
सामान्यवाचित्वेन अर्थवाद इति तन्वेवं ब्रह्मवर्चसश्रवणमप्यर्थवादः स्यात् । नत्वन्वाचय इ

तिवाच्यं अत्र कामपदोपबंधस्य लेशेनैव स्यादिति भावः। सत्रे काम्ये कर्मणि स्वर्गो नित्यफलं ब्रह्मव
र्चसादिकं तु त्वाचयफलं यथा प्रस्तरप्रहरणादौ यज्ञांगे कर्तृप्रकारो नित्यः सकृत्कृषाकृष्यकाभ्या
युरादिकं तु त्वाचयफलं तथा॥ सार्वी॥ पूर्वं गृहदोहापि नानेकफलार्थत्वमिति संगतिः। वाजपेयेति।
सप्तदशारत्निर्वाजपेयस्य यूप इति वाजपेये यूपस्याभावेपि तदंगपशुयागद्वारानयोः परंपरासंब
धइवेत्यर्थः। ननु गानांगप्रधानफलोपकारमात्रेण तादर्थ्यं वत्प्रधानस्य गुणफलार्थत्वप्राप्तम
न्यथेत इत्यत आह स्यात्प्रधाने तिनदृतयहाः प्रधानार्थत्वात् नत्विति प्रधानस्यांगार्थत्वाभावादि
ति भावः। आह आर्थेम ध्याहार्यं इत्यक्रूरीत्या अनुवादसंयोगादिति भावः। फलविधिरिति नचैवं बृहद्याया
मसाध्याश्वमेधादानपर्यंशंकसाधन तारम्यात्फलतारतम्योपपत्तेः। नापि स्वर्गकामादिवैय
र्थ्यं आम्नानबलात् उभाभ्यां वाक्याभ्यां फलसंबंधज्ञानस्य कर्माभ्युदयकारित्वकल्पनादिति भा
वः। नत्वा। प्रासंगिकीं संगतिः। यपीति प्राभाकर इत्यर्थः। अपूर्वमिति तेन नियोगं प्रति नियोज्यो गुणः
भूत इति। नियोज्यविशेषणं कामनापि नियोगगुण इत्यर्थः। अंगमिति। ननु स्वतत्कामनाविरहेन

शा-टी-

त्कामनियोज्यकत्वाभावान्न फलकनियोगासिद्धेः न सर्वफलयौगपद्यमिति भावः। नन्वस्तु तो
पि कल्प्यः अन्यत्र स्वर्गादेः फलत्वस्य नियोज्यविशेषणाकामनानिबंधनत्वादित्यत आह का
मोपबंधस्त्विति यत्र विहितभावनायाः इष्टभाव्यकत्वस्याभावात् स्वर्गादेरिष्टत्वबोधनेन तद्भा
व्यत्वस्य चकोसौ न तु स्वयं नेड्क्षरीत्या फलसाधकः नियोगस्य विध्यर्थत्वासंप्रतिपत्त्या नियो
ज्यान्वयस्याप्रामाणिकत्वात् उक्तनेतु न त्कामपदाभावान्नियोज्यद्वारापि कामकानां नियोग
सिद्धावंगस्यादिति भावः युगपच्छाकटानं चाविनिगमेनेत्याह कामनावशाद्वेति काम्यदर्शा
न दिप्रयोगस्य तु नित्यावरुद्धस्यासंभवात् तेनवकाशनया स्वर्गादेः पापक्षयसापेक्षतया च स्वर्गे
पापक्षयोसहकृत्वयोगादेवेति सोक्तमिति बोध्यं। आहार्यमध्याहार्यउक्तरीत्या अनुवाद्य
योगादिति भावः। फलविधिरिति न चैवं व्यूढायामसाध्याश्वमेधाद्यो नर्थकं शकं साधनत्वा श्री ए॰
त्तम्यात्फलतारतम्योपपत्तेः नापि स्वर्गकामादिवाक्यवैयर्थ्यम् आम्नानबलादुभाभ्यां फल
वं संबंधत्वानस्य कर्माभ्युदयकारित्वकल्पनादिति भावः। यथेति यथा तत्र फलभूपस्त्वेच्छाया

मपि यद्याचोदितमेकफलमुक्तिमुद्दिश्यैवकर्मप्रयोज्यं तथेत्यर्थः इष्यतइति एकाहशोपुनः पुनः
प्रयोगस्यव्यवस्थापयिष्यमाणत्वादितिभावः। ननु सर्वशास्त्रस्योद्देश्यसमर्पकत्वात्तदर्थः साहसं
उ ग्रहत्वबद्धिवक्षितमतआह नचेति सर्वशास्त्रोद्देश्यसमर्पकत्वस्यसापेक्षत्वात्किंनु निरपेक्षः काम
शास्त्र एवेतिभावः॥ योग॥ इदानीमितिदर्शादेः सर्वफलत्वेस्थितेतत्संयोगात्तदैहिकामुष्मिकत्वंचिं
त्यतइत्यर्थः। चित्राद्युदाहरणंतुविषयव्याप्त्यर्थंबोध्यं। पश्वादिकस्वरूपप्राप्तेरुपायांतरेणापि
संभवेनविधिगम्यत्वायोगादिहांतरीयभोग्यपश्वादिकमेवचित्रादेः फलमतआमुष्मिकत्वमि
त्याह नत्रेति विपाकः प्रतिबंधकत्वाभावेफलोत्पत्तिरत्वनंतदैवमदृष्टंपुरुषकारोदृष्टं नतदुक्तमि
ति नकेपादइतिशेषः शास्त्रेति शास्त्रप्रमाणकंचित्रादिकमित्यर्थः सत्वेइहाप्येषांकर्मणां फल
योगस्यसिद्धिः स्यात्ननत्वेमुत्रैवस्वर्गार्थे सफलस्यजन्मांतरीयत्वेनियोगित्वानवगमात्॥ समा श्रे
गत्वेनप्रयोजनसंबंधः प्रधानेनसंबंधः। अपमेतद्वाक्यप्रतिपन्नइत्यर्थः इममेवस्फुटयतिवाज
पेयांगत्वेनेतिकालविध्यर्थः संयोगः कालार्थः संयोगइतिव्याचष्टे वाजपेयेति वाजपेयस्यपरा

शा·दी· र्थत्वात् बृहस्पतिसवानंगत्वोक्तिः। श्लोके दृष्टान्तार्थो विरोध इति यः। विरोधाकामस्यात्म बृहस्पतिस
वेन यजेतेति वचनात्। ननूत्क्रामस्य पस्य पूर्वकालोर्थः। स च वाजपेयस्य बृहस्पतिसवापेक्ष
यानविधेयः बृहस्पतिसवपरेण यजेतेत्यनेन तदंगकालविधेरेवोचितत्वात् बृहस्पतिसवस्य
वाजपेयोत्तरकालविधौ लक्षणास्यात्तत्राह तस्माद्धिहीति। वाजपेयपूर्वकत्वं तदुत्तरकालत्वप
र्यवस्यतीति भावः। एवं च सर्वत्र पश्वादिफलकत्वमात्रावेदकशब्दस्वारस्याद् नियमवद्धिहापि क्रास्वार
स्यात्कालविधिरिति संगतिः। अत्रसंतेति। अंगविधावपि वाजपेयशब्दस्य विधेयसमर्पकत्वाभावात्त्वा
र्थपरविध्यर्थे स्वोच्चारणमिति किंचित्ताद्रार्थ्यमस्त्वादसंतेति प्रक्रियाप्रकरणेन चेति आहवनीयादि
वत्कालस्योपादेयत्वाभावादिति भावः। भिन्नमिति प्रकरणान्तरन्यायादिति भावः। अनिर्दोतेति त
तश्च फलवन्न्यायादंगत्वमिति भावः। सूत्रे समवाये गांगिभावलक्षणसंबंधे वोद्गतास्यात् वाजपेया श्री एम:
दिसंयोगस्यार्थवत्वात्। ।७।। पूर्ववैषम्यात्संगतिं सूचयति संस्थासंयोगादिति। अत्रापूर्ववदं
गांगित्वमिति संगतिः किं कर्मान्तरत्वमाश्रित्यांगांगित्वं तदनाश्रित्य वा तत्राद्यमाह आग्नेमारुता

र्थोनामन्वाधानानामनन्यत्वात्सवनीयपक्षे र्थोऽन्वाधानाः स्वकाले कार्या द्वितीये सवनीयपक्ष
र्थे तया चोक्तं क आघ्रानानामन्वाधानानामभावान्न हि विकृतिष्वन्वाधानाभावः सिद्धांते तु सवनीयपक्ष
र्थोनामेवाग्निमारुतोत्तरकालविधानात् न स्वकाले पृथगन्वाधानं वा सवनीयविकृतिष्वन्वा
धानाभावः सूत्रे कर्मोनु सन्निपत्याग्निमारुतादिवासौ काल एव स्यादन्वाधानानां प्रयोजकत्वान्तरसंबं
धेनाग्निमारुतार्थेन याविध्ययोगात्॥ ७ स॥ दर्शोपलक्षितं इति दर्शपदं पूर्णमासस्याप्युपल
क्षकं। एवमग्रेऽपि। वाजपेय इह स्यादिति सवन्यायाद्वकाशमाह सर्वेति ननु न्वनुपादेयकालसमभि
व्याहारान्मासाग्निहोत्रवत्तत्कर्मांतरं किं न स्यात्तत्राह दर्शोत्तरेति दृष्टांते तु न संनिधिरिति भावः।
प्रकृतेपि दर्शांगमस्तु तत्राह प्रकृतस्येति नि ज्ञातप्रयोजनस्यांगत्व पूर्वपक्षो न मुख्य इति द्योत
यितुं तावदूहः नहि दर्शपूर्णमासावेवकर्मांतरत्वाद्दर्शांगिभाव इति संगतिः विधापकेति दर्शपूर्ण
मासाभ्यामिष्ट्वेत्यंशे विधिप्रत्ययाभावादित्यर्थः ननु सोमांमासेष्टुतोपि विधिप्रत्ययस्याविपरिवर्त
मानत्वेन विधातुमशक्यत्वाद्बहिर्नावपि दर्शपूर्णमासौ विधास्यन्ति तत्राह दर्शोत्तरेति कालस्या

नुपादेयत्वयोर्हेयत्वात्प्रकृतस्यापि कालोद्देशेन विधिसंभवादुद्देश्यकालविशेषणदर्शादेरप्युद्देश्य
कोटित्वाद्विधेयत्वासंभवाच्च न तद्विधिः किंतु तदुत्तरकाले सोमविधिरित्यर्थः नन्वेवमपि त्रयीप्रसा
त्तद्विधिरस्त्वत आह न चेत्यादिना प्रयोजनं पूर्वपक्षे सोमारंभे दर्शपूर्णमासधर्मकं फलं मोनरमनुष्ठे
यं सिद्धान्ते नेति सूत्रे कर्मान्तरोत्पत्तिकालविधिसंदेहे ॥ फल ॥ सोमस्य दर्शपूर्णमासोत्तरकालत्वे
भिहितेऽनन्यसंगाद्युत्तराधिकरणे वक्ष्यमाणेष्टेः कालो निरूपयिष्यते तत्र च कुमारविपत्तिप्रसं
गाज्जातकर्मानन्तर्यमिति करिष्यमाणसिद्धान्तः पूतत्वादेः पुत्रगतत्वं विना नोपपद्यत इति तदु
पयोगित्वेनात्र पुत्रगतत्वनिरूपणात्संगतिः आत्मनेपदादिति कर्तृगामिनि क्रियाफले आ
त्मनेपदविधानादिति भावः येनेति अत्र विध्युद्देशे फलाश्रवणादर्थवादस्यैव फलकल्पकत्वा
त्तत्र च पुत्रगतत्वप्रतीतिरिति भावः सूत्रे वाक्यशेषफलितत्वेनाचोदितेऽपि तदीयफलसंयोगान्नस्या
त्फलस्यानंतरश्रुतिविशेषत्वाभावात् ॥ एवं वा ॥ निमित्तेति निमित्तं पुत्रजन्मकृत इति उत्तरपादद्वयाणां
स्नानं प्राप्तिविधायेत्यापस्तंबवचनात्प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते। स्नानप्राशनतः प्र

श्रीरामः

वेच्छिन्ननाले तु सूतकमित्यादिवचनाच्च स्तन्यपानं जातकर्मानंतरमिति भावः। वर्णकांतरमाह
पुनरिति पूर्ववैषम्यात्संगतिः अपि वेत्यादि सर्वशास्त्राधिकरणसिद्धांतसूत्रेण ह्लृन्मांगशक्ताव
पि निमित्तवशादेकदेशप्रयुक्तस्यापि प्रधानस्य प्रयोगो वक्ष्यत इत्यर्थः पौर्णमास्येति यदृच्छापप
सुनेति वाक्यविहितेत्यर्थः वर्णकद्वयं प्रगोधिकरणगुणसूत्रस्येति ध्येयं॥ प्रथा॥ वैश्वानरीमाति
देशिककालबाधेपी हतद्वाध इति संगतिः अतिदेशेति बृहस्पतिसवनाम्नाऽतिदेशप्राप्त इ
त्यर्थः सांगस्य हीति एकाहशेदेशकालकर्तृणां सांगप्रधानसंबंधस्य वक्ष्यमाणत्वादिति भा
वः वाजपेय इति वाजपेयमात्र इत्यर्थः उपदेशापेक्षया दुर्बलत्वस्यातिदेशस्यैव संकोच इति परिहरति
अतिदेशोपीति कालोपसंहार इति अतिदेशिकेत्यादिः ननु यदि वाजपेयेन स्वकार्यं कृतं तर्हि बृ
हस्पतिसवे वैयर्थ्यं तत्राह निवृत्तमिति॥ ॥इति श्रीचंपकनाथकृतौ शास्त्रदीपिकाव्याख्याने च
तुर्थस्य तृतीयः पादः॥ ॥ श्रीमते रामानुजाय नमः प्रक पूर्वपादे फलत्रयुक्तिर्विचारिताइ
हतद्प्रवाहः प्रायेण विचार्यत इति पादांतरत्वमानंतर्यं च। अनुमत्यादीनीति अनुमत्यै पुरोडाशा

शा॰ दी॰ मष्टाकपालंनिर्वपतीत्यादीनीष्टिरूपाणि आदित्यां मल्हां गर्भिणीमालभेत इत्यादि पशुयागात्मका
नि पवित्रादि सोमयागात्मकानि पवित्रादि सोमयागात्मकानि वल्मीकवपायां होमइत्येवमादीनि दर्वि
होमरूपाणि चेत्यर्थः विदेवनं पष्ठौहादीनीत्यन्ते देवनं आदिपदेन राजन्यं जिनाति शौनःशेपमाख्या
पयते अभिषिच्यत इत्यादि संग्रहः। अध्यायसंगत्यर्थं पुरुषार्थानीत्युक्तिः फलप्रयुक्तानीत्यर्थः ल
क्षणया अत्र दोषं न्यायाह अनुवादभूत इति नाम्नां नामार्थानां स्थितमिति द्वितीयार्थ इति शेषः। यन्ने
काधिकरण एव तु इति राजसूयपदस्याभ्युदयमानावस्थ्यक्षत्रिये अभिषेचमानावस्थ सोमद्रव्ये च वृत्ति
साम्येनानार्थानि णियान्त उद्देशेन यजेर्लक्षणेति भावः। प्रयोजनं पूर्वपक्षे प्रकृतानिसर्गाणिकर्माणि
फलोद्देशेन संकल्प्यानि सिद्धान्तेनु यागात्मकान्येवेति सूत्रे प्रकरणे श्रूयमाणो राजसूयशब्दः प्रक
रणाशब्दस्तस्य साधारण्याद्वा ध्रियमानानामन्तर्गतं सर्वेषां सम प्राधान्यं॥ मध्य॥ विदेवनादीनामंगत्वं
यदुक्तं तस्य विशेषव्यवस्थापनेन दृढीकरणात्संगतिः सिद्धान्तसौकर्यार्थमाह। तत्र विदेवनेति। पू श्रीरामः
र्वपक्षसौकर्यार्थमाह तद्रीपति नन्वभिषेकस्यैवापदस्थापनेन कर्षोनी विदेवनादीनां तत्राह अयं

चेति मध्यपातादिति मध्येऽनुष्ठानात्संदेशेनावांतरप्रकरणमुत्पन्नमिति भावः। तत्रेति। अनुष्ठानस्यापा
त्रपयुक्तभावनावगत्यनंतरभावित्वात्ततः प्रागेव प्रवृत्त्यन्नित्वेन तत्रैव प्रयोजनापेक्षा तत्रैव प्रकरणोद्भूति
र्यत्रानुष्ठानं तत्रेति भावः। सन्निधीति। अनेन नात्रावांतरप्रकरणप्रसक्तिरिति सूचितं प्रयोजनं पूर्व
पक्षे विदेवनादीनि अभिषेचनीयारंभेंऽतरायशंकानुत्थेऽपरिगणनीयानि सिद्धांते राजसूयारंभे सूत्रे विदे
वनादि यस्याभिषेचनीयस्य प्रयोगमध्यस्थं तदंगं तन्मध्यपातात्। प्रका। एवमधिकरणद्वयेन यागा
नां प्राधान्येऽयागानामंगत्वे च स्थिते यागानामपि न सर्वेषां प्राधान्यमित्याक्षेपात्संगतिः। तत्रेति।
प्रकृत सर्वयागपरत्वाय प्रकरणापेक्षेति भावः। साक्षादिति निरपेक्षेण स्वशब्देनेत्यर्थः। प्राधान्य
पराशेषषष्ठीत्याशयेनाह षष्ठीति। यथा कथंचिदिति सामीप्यलक्षणया वा सामीप्याक्षिकपूर्व
त्वावलंबनेन वेत्यर्थः। ननु दिग्वाचकपदयोगनिमित्ता षष्ठी पदांतरसापेक्षत्वादुपपदविभक्तिः शेष
षष्ठी तु निरपेक्षा ततः प्रबलाहागांगीति प्रदानर्थकादूरं षष्ठी स्वारस्यहानमिति भावः। नहीति। उ
त्पत्तिविधिस्थनैकार्थे विशिष्टैकार्थविधिक्षमः। इह तु सोमस्य प्राप्तत्वात्तदनुवादेनोभयविधौ वा

श्रौ॰ टी॰ क्यभेदः स्यादिति भावः। प्रयोजनं स्वर्वतराधिकरणवत्सत्त्रेष्वकृतयागत्वाविशेषेपि उपसदंगत्वे वषषो
न्तत्तोयाभ्यां न्याय्या उपसदंगत्वपुरस्तात्कालोभयविधाने तु न शंकनीयं वाक्यभेदेन विघातिपि इत्वा
24 त्वा॥ फल॥ सोम्यस्येव फलार्थत्वादंगत्वमिति संगतिः तदाश्रयणादिति अत्र षगाश्रयणादित्यर्थः
याते अग्ने रजाशयाइत्याहाविति शेषः। अनपेक्षत्वेति चोदकप्राप्ते रेवकर्षभावाकांक्षाशांत्यान
दाकांक्षारूपप्रकरणाभावेपीति योजना। तदंगत्वेति तथा च नाम्नातिकत्वमिति भावः आमनेति आ
मनहोमानोदर्विहोमत्वेन प्रयाजानुयाजानूयाजाभावादृत्यता प्राप्ततद्विधाने गौरवादिहकी
र्त्यमानाः प्रयाजानूयाजाः सांग्रहण्यर्था एव ते च प्राकृताः प्राकृताश्च प्रदार्थाविकृत्याम्नाता अथा
कांक्षयैव ग्रहत्वं तेन तत्र यावत्प्राकृतग्रहणं सांग्रहण्यर्थाकांक्षानुवृत्ते राकांक्षया प्राकृतेषु ग्रहेषु मा
णिषु तत्त्वध्यपतिता आमनहोमात्रपि सह याज्याइत्यवर्जनीयं तेषामपि प्रकरणग्राह्यत्वमित्यर्थः प श्रीरामः
रिधीति। सजातेषु भूयासमिति परिधान्यादिहधातीति तैत्तिरीयशाखायां परिधिमंत्रविधायकैः शा
खांतरे वा परिधिमंत्रैरित्यर्थः सत्त्रे फलवत्त्वं सांग्रहण्यादिकमितरस्या फलस्यामनहोमादेः प्रधानं स्यात्तत्

नत्सेषाम फलत्वं व्यवधानात् नानुषज्यत इत्यनुषंगाभावस्योक्तहेतुकत्वादनुषंगसंभवे च फलवत्वासंभवात्।
दृष्टि॥ अंतरितः याग इह हि ऋत इतः प्रभृति विस्मरत इति यावत्। आह सुजे उस्यत इति यावत् आम न होमानां
फलश्रुतिसंयोगाभावात् फलार्थत्वाभावेपि इह धिग्रहस्य निमित्तश्रुतिसंयोगात् नैमित्तिकत्वमिति संगतिः
अस्त्वेवात्र सिद्धिराचुर्यात्पाथम्यमेव ज्येष्ठस्य ग्रहार्थः। न चापि तद्वत् आदेव नित्यत्वं सिध्यतीत्याह यत्त्विति
नियोगो नियमः। सिद्धान्तमाह न त्वेवमिति यदि हि श्राद्धादीति आदिना समग्रमीय छदस्येति कादाचित्कं हि निमि
त्तेन चोद्देश्यमधिकारिविशेषणं च तत्तस्य यादृशेन यच्छब्देन कादाचित्कत्वमधिकारिविशेषणत्वमुद्देश
श्च भवति नादृशाय च्छब्दो निमित्तत्वावगतिर्वा व्याप्यत्वकर्तृसमानाधिकरणाद्यस्य गृहान्दहेत्
यस्याग्निनेवधस्यमोनेसूर्यो नाविर्भवति त्यादिषु गृहदाहादेर्यजमानांतरव्यावर्तकत्वेनासाधारण्यकत्व
प्रत्यायनाद्यस्य गृहान्दहति स निर्वपेदिति कर्तृसमानाधिकरणस्यैव यच्छब्दस्याधिकारिविशेषसम
र्पकत्वशक्तेः यस्येति यच्छब्देनोद्देश्यावच्छेदकत्वेनात्तत्वभावादिति भावः सत्रे देवतांतरस्य निमित्तश्रुतिसंयो
गात्॥ वैश्या॥ उखाया उखायामग्निं प्रवृञ्ज्यादिति वर्तमानापदेशत्वादिति भावः सत्रे त्रीण्येतानि हवीं

शा॰ टी

षिमवृंतित्रयइमेलोकाएषांलोकानांरोहायेतितिनिस्तैर्लोकैरग्न्यावेसमवादित्यवेश्वानरगणां हविषां समग्रसं
ख्यत्वोत्तरालोकवदेवहविषांनित्यत्वावगमाद्वैश्वानरोनित्यः स्यात्॥ षट्॥ आतिदेशिकोस्येगतिःचित
यइएकाग्रस्तारा॥ नित्येनैमित्तिकीवेतिसंशयेफलभेदंसूचयन्नाह किमितिप्रहरणेति नस्यप्रहरणेऽडि
तिविहितइत्यर्थः अभिधानेति अभिधानक्रियोपाधिकाषट्संख्यातत्प्रहरणार्थत्वेनप्रत्ययोपपत्तिरि
तिभावः सत्वेषड्वितिकोऽग्निःप्रवेवन्निस्यः स्यात्पंचचितिवत्षष्ठ्यपिनित्येतिवा॥ पित्र्य॥ कर्मवच
नेनेति अग्न्येगावोवास्यताभितिवत् शेषएवापिसप्तमीतिभावः। फलेति अनेनार्थवादोपनीतत्वाद्
स्त्रनैमित्तिकत्वंप्रकृतेतुत्वसंतानुपस्थितेफलंकल्प्यमनोगत्वमितिसंगतिः पुरुषार्थइति नचैवमे
कस्यकर्मणःपुरुषभेदेनक्रत्वर्थत्वंपुरुषार्थत्वंचबोधयतोवचनस्यवैरूप्यंस्यादितिवाच्यं। अनाहिता
ग्निविहितायपणादिवत्तस्यस्मार्ताग्निसाध्यकर्मान्तरत्वादितिभावः दर्शेनदर्शकर्मणाश्राद्धेपिंडपितृयज्ञः श्रीरामः
तेनविनादर्शकर्मणाविनानन्वमासिमासियदाहर्भेइत्यादिस्मृतेर्मासिश्राद्धस्यापमावास्यातिरिक्तका
लोनप्रसक्तइत्याशंकापरसेववनात्यसक्तिमाह सर्वेष्विति स्मर्यंतइमिति सर्वेष्विति वचनमित्यर्थः॥ पञ्च॥

२५

पित्र्यत्तस्य दर्शांगत्वे कालवाचिशब्दाद् बाधवदिह कस्यचिद् धर्माभावात्पश्वंगं दर्शनेति संगतिः द्वितीयाचो
दकशब्दाद्दर्शनान्नो द्वितीयेत्यर्थः वाक्येनेति समभिव्याहाररूपलक्षणवाक्येनेत्यर्थः परिव्याणपदं वित्व
णेति स्पष्टं इति प्रतिमोचनं बंधनं नन्वेवं धर्माकरमतेर्दर्शनायाः पशुबंधनाय यूपत्वाभावे कथं पश्वर्थता
तत्राह यूपस्यैवेति तथा च पश्वर्थयोपाकरणार्थपरिव्याणद्वारा पश्वंगं दर्शनेति पूर्वपक्ष इत्यर्थः आकृ रि
ति । पद्यमिति । द्वितीयावत्त्वादिति भावः तथास्तीति यूपस्यैवानयार्दशनया परिव्याणेन तन्नयायपे प
शुबंधनीयमिइति चोदकप्राप्तेयेकयेवरशनयापशोर्बंधनमिति पक्षद्वयेपि नानुष्ठानविशेष इत्यर्थः
किंच भाष्ये सर्वनीयं विकृतिष्वेकादशिनीषु इति पशुरशनाकार्येति पूर्वपक्षद्वयोजनमयुक्तं निषिध्ये
दित्याह पशुगणा इति सर्वेषामिति पशुगणाकरणानामित्यर्थः । स्वपक्षे तु बंधनार्थत्वे नदर्शत्वेना
न्नत्वसपशुबंधनार्थरशनाभेदस्यावश्यक इति भावः सूत्रे आगमे विधानात् । पशुसंबंधमागमप्य
विधानादितियावत् ।। सूत्र ।। रशनावत्त्वरूपयांगमिति संगतिः अवयवेति व्यतिरेकशद्वेन
तत्सहचरितसंबंधलक्षणयावयवनिबंधनाषष्ठीत्यर्थः यद्यपि दृष्टाद् दृष्टसंस्कारसमुदायात्मकेप

शा॰टी॰

पावयवत्वं स्वरो नीक्तितथापि तद्धारहृक्षावयवलाभिप्रायाषष्ठीत्यर्थः प्रयोजनं पूर्वपक्षे सोमे अग्र
ग्नीषोमीयपशुजननेनैव प्रतिपत्तिसिद्धेः ॥ नानात्वं बध्यार्थधारणोपयुगणीयस्य कस्य चित्तस्य शोरंजनं
सिद्धांते तु यावदन्तं बध्यंजनेन धारणोपयुगणीत्व सर्वेषामंजनं ॥ दर्श ॥ इतरेषां कालयोगरहितानामा
26 घारप्रयाजादीनामित्यर्थः पौर्णमास्यधिकरणेन पौनरुक्त्यं परिहरति एवमिति एवं संयुक्तौ एवं स
युक्तौ एवं शाहसंयुक्तो राजसूयवदित्यनेनैव पासाहोराजसूयवाक्ये प्रक्रांतो पायं समप्रधानांगांगित्ववि
चारस्तत्संयुक्ते विचारांतरसमाप्तौ स एव विचारः क्रियत इति संगतिमपि सूचयति ननु विद्धद्वासस्युत्या
दितसमुदायद्वयस्यैव फलवाक्ये प्रतीतिस्तत्राह नामधेयं तावदित्यादिना प्रतिरूपकमिति अव्ययत्वादि
ति भावः ननु विद्धद्वाभ्यां पौर्णमास्यमावास्याशब्दाभ्यामेव वस्तुसन्तो ननु दर्शपूर्णमासशब्दाविव्याशंक्याह न
चेति दर्शेत्युपलक्षणं तथा च दर्शो गणे तयोः पूर्वः पूर्णमास उत्तरः अथ य एष सो पौर्णमासो पूर्वो मालभते तेन द
य यापूर्वं क्रियते तेन तत्पूर्वमारभमाणः सरस्वत्यै चरुं निर्वपेत् सरस्वते द्वादशकपालममावास्यायै सरस्वती श्रीरामः
पूर्णमासः सरस्वान् अमावास्ये तौ यथापूर्वं कल्पयित्वारभत इत्यत्र दर्शपाद् नोक्तं स्यामावास्यामावास्यावै

सरस्वतीत्यमावास्याशब्देननिर्देशादित्यर्थः। प्रयोजनं पौर्णमास्यधिकरणवत्। ज्योतिः। पूर्ववदाख्यात
स्यनामधारतंत्रं वारयति नामधेयमिति नद्ध्रुदिह वासांतरे प्रसिद्धत्वाभावादितिभावः। तथा च पूर्वैर्वैवस्यात्सं
गतिः। ननु ज्योतींषि स्तोमान्यस्येति योगः सोमयाग एवास्तीत्यत्राह ज्योतिराख्येति ननु वक्ष्यमाणवाक्य
शेषे त्रिवृदादीनां स्तोमानां ज्योतिष्ट्वमुक्तं तत्राह त्रिवृदिति ननु यहं वा एष हीत्वेतिवाक्ये स्तोत्रं सोमसंस्का
रकस्य ग्रहणस्य चमसोन्नयनस्यांगमित्यवगमाद्वाक्यसंयुक्तस्य स्तोत्रस्य न प्रकरणेन सर्वयागार्थ
ता एवं च स्तोमाश्चापि स्तोत्रांगभूता सद्वारा सोमयागांगभूता इति शंकते सोमयागे इति ननु स्तोत्राणां सर्वया
गांगत्वेपि कथं त्रिवृदादिस्तोमानां सर्वयागसंबंधसिद्धिस्तत्राह स्तोत्रीयासंख्येति तथा च स्तोत्रीयासंख्या
याः स्तोत्रांगत्वात्तद्द्वारा त्रिवृदादीनां तत्सिद्धिरित्यर्थः। ज्योतिष्टोमपदेति तदाहुः कतमानि तानि ज्योतींषि
य एतस्य स्तोमा इति प्रक्रमानुसाराद्धि देवाभंनाम निर्वचनार्थं न तु स्तुत्यर्थमिति भावः। ज्योतिः शब्दस्यागौ
णत्वेपि निर्वचनोपपत्तेराह अथापीति अभिष्यन्नेरिति अनेनेदं फलं कर्तव्यमित्यवगमानंतरभावा
त्कथमिदं कर्तव्यमित्याकांक्षारूपप्रकरणस्येति भावः। दीक्षणीयादीनां विकृतिष्वनामिदेशादिति देशोऽस्

शा॰ दी॰ योजनं। सूत्रे कारणांशप्रयज्जिहरूपत्वं॥ ॥ इति श्रीचंपकनाथकृतौ शास्त्रदीपिकाव्याख्याने प्रकाशा
ख्याने चतुर्थाध्यायस्य चतुर्थः पादः॥४॥ ॥ श्रीमते रामानुजाय नमः॥ श्रीगणाधिपतये नमः
२७ समाम्नायाध्यायः श्रीगुरुचरणारविंदं शरणं प्रपद्ये॥ ॥ श्रीनिा हेतुहेतुमद्भावसंगतिं लक्ष
णयोः स्वचयन्नूह्यत्रमनुवदन् वर्णयिष्यमाणं प्रतिजानीते प्रयुक्तीति प्रथममिति अध्यायारंभासि
शा८ ध्यर्थं तपेतिशेषः। सौत्रस्य श्रुतिलक्षणस्य व्याख्यावेदविहितइतिप्रयोगे तिनियमाश्रयणेन दे
षपरिहारार्थं क्रमनियमानुसंधानपत्त्वादिना विलंबात् प्राप्तभावोन स्यादिति भावः। चोदनासूत्रे
णैवेन कृत्समाधानमाह प्रागिति। अथवा॥ अभावार्थत्वेनेति भावार्थभिन्नस्य स्वतोनुष्ठेयत्वाभावा
दिति भावः। तस्यैवेति संघातस्यैवेत्यर्थः श्रुतिलक्षणमिति एवं चास्मिन्न लोके सौत्रश्रुतिशब्दावि
धिपरइति भावः॥ विततिरूपमिति यथान्तरणादिप्रचयस्यैकस्मिं देशे पूर्वपरभावापन्नतयातद्देशाव
यवशो विस्तारस्तथा एकस्मिन्नेष्टीमास्यादिकालेऽनुष्ठेयक्रियाप्रचयस्य पूर्वपरभावापन्नतानेक श्रीराम:
क्षणेषु विस्तारस्तद्रूपमित्यर्थः संघातस्य विधिर्नास्तीति यदुक्तं तत्राह बहवइति श्रुत्यादीति श्रुत्यर्थ

पाठश्चहन्निस्यानमुख्यप्रमाणेरित्यर्थः। ननूत्क्रान्ततःशब्दोनविततिरूपक्रमवाचकावितिनस्तुतिः
पाठादेस्तत्स्तुतित्वमप्रसक्तेश्चात्र नः शब्दानभिहितः। कथंविधेयस्तत्राह अनभिहितोपीति पठितशब्दा
ब्दानभिहितोपीत्यर्थः कथंचिदध्याहारादिनाप्रकृतेतिचोदकोपस्थितःप्राकृतोपकारोपयावि
कृतोप्रयोगविधिनाविधीयतेनयेत्यर्थः॥ अथवा॥ एवमध्यायारंभेसमर्थ्यार्थपाठाद्यपेक्षयास्तुतेः
प्राबल्यात्प्रथमस्तुतिक्रमविचारपरतयाव्याख्यानमाहायवेति आग्नेयोद्दशमोग्न्यनरस्यादे
क्रमविध्यवच्छेदभावेनपूर्वपक्षासप्रवर्तेराह क्वचिदितिकिमयंपाठप्रमाणकः क्रमः उतस्तुतिप्रमाण
कस्तदर्थंचकिमिहदीक्षाविधीयतेउतक्रमइतिसंशयमनुयमाकलय्याह किमितिपाठादितिक्रमस्य
यत्स्वनुवादइतिभावः प्राभाकरः शंकतेकश्चितिइमानितिगृहपतिर्ब्रह्मोद्गाताहोतेत्यर्थः उत्तरं
चोदकेति ननुयेयजमानास्तऋत्विजइतिऋत्विक्कार्येयजमानविधानात्सत्रेद्वयोरभावात्नचो
दकप्राप्तिरितिशंकतेनन्विति उत्तरमसत्तइतिनन्वेवमध्वर्युर्गृहपतिंदीक्षयित्वाब्रह्माणंदीक्षयतितत
उद्गातारंततोहोतारमित्यत्राध्वर्युलक्षणकर्तृविध्यसंभवेपितत्तत्संस्कारार्थस्यामदीक्षयित्वाधिनो

शा.दी. दीक्षयति ब्राह्मणाच्छंसिनं ब्रह्मणः प्रस्तोतारमुद्गातुर्मैत्रावरुणं होतुरित्यध्वर्यादिदीक्षायामप्राप्तस्य
प्रतिप्रस्थातुर्विधिः किं न स्यादित्याशंकाध्वर्योरनुपपन्नो तन्त्रस्याप्यनन्तत्वादेव प्रतिप्रस्थातुः प्राप्ते
नैवमित्याहाध्वर्युर्दीक्षायामिति त्वेतिपुष्कलं हस्याभिमुख्यपुरुषपरत्वेन स्वस्य स्वदीक्षाकर्तृत्वे
मन्त्रलिंगविरोध इति भावः। नन्वेवमपि ब्राह्मणाच्छंस्यादिदीक्षायामध्वर्युरेव प्राप्नुयान्न तु प्रति
प्रस्थातेत्याशंक्याह उत्तरेष्विति ब्राह्मणाच्छंस्यादिष्वित्यर्थः। इतरमित्ययं सत्रैकदेशस्तृतीये व्या वि
ख्यातः एवं ततन्तस्तं नेष्टा दीक्षयित्वा पादिनो दीक्षयन्ततोऽपि नो दीक्षयति आग्नीध्रं ब्रह्मणः प्रतिह ति
र्तारमुद्गातुरच्छावाकं होतुरित्यत्रापि न नेष्टुर्विधिः तथा नततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति
पोतारं ब्रह्मणः सुब्रह्मण्यमुद्गातुर्ग्रावस्तुतं होतुरित्यत्राप्युन्नेतुर्नेविधिः प्रत्यासत्त्यैव प्राप्तेरित्याह
एवमिति एवं तमन्यो ब्राह्मणो दीक्षयति ब्रह्मचारी वाचार्यप्रेषित इत्यत्रापि न कर्तृविधिरर्थादेव प्राप्ते श्री एषः
रित्याशयेनाह अन्य इति ननु विनियतिवाचकाभावात् कथमयं श्रुतिक्रमस्तत्राह अनभिहितोऽपीति यत्र
क्रमस्तद्धि शिष्टपदार्थानां गविधीयते न तत्र श्रुतिक्रमः न नतु यत्र क्रमाभिधायी शब्दस्तत्रेति भावः। अ

योदिक्रमोपि तर्हि श्रुतिक्रमः स्यात् तस्यापि प्रयोगविधिविधेयत्वात्तत्राह यो दिष्विति श्रुतिक्रमस्य प्रा
प्तिस्विकविधिविधेयत्वमप्यस्ति अर्थादिक्रमस्य तु प्रयोगविधिमात्रमिति भेद इत्यर्थः। ननु त्वक्तात तः
शब्दबलात्तत्कथं विरुद्धतीयमानवितति विशेषविधिः किमिति स्त्री क्रियत इत्याशंकैकवाक्यत्वलोभादि
त्याशयेनाह एवं चेति। अनेकाख्यानानुगुण्यादाह यदेति फोवोपयेन तुल्यलब्धमेवं तत्र्यमित्यर्थः। अ
न्यथा तत्र्यतेऽनेकपदार्थानुष्ठानेप्यविरोधेन प्राप्तभावानत्रगुणत्वादुद्देश्यत्वप्रसंगात् प्रयोजनेपा
स्य ठक्रमते पाठश्रुतिमितो दुर्बलत्वात् यत्रैतादृशस्थले विपरीतक्रमबोधकश्रुतिरस्ति तत्र पाठक्रमस्य
बाधः श्रुतिक्रमस्तु तुल्यबलत्वाद्विकल्पः। अर्थो। विध्योरिति। पूर्वत्र विधेयसंतत्त्राभावात्कथंचिदु
पस्थितार्थविधायकत्वं युक्तं न त्विह विधेयांतरसत्त्वादिति भावः। अत एव संगतिः सिद्धांतमाह प्र
योजनेमिति श्रुत्या। यवागूमिति द्वितीयया सूत्रे च शब्देन पूर्वसूत्रस्थसाध्याकर्षः। अनि। अनुमंत्र
णेत्यनेनानुमंत्रणमंत्रत्वात् द्वादशन्यायेन समुच्चयः सूचितः न तु नियामकाभावेन क्रमाभावस्य
स्पष्टत्वात् किमर्थमिदमित्याशंकेन तन्निरस्य पूर्वपक्षाभिप्रायमाह यद्यपि त्वेति प्रत्यासत्तीति प्राजा

शा·दी· पत्यपश्रुत्पु उपाकरणनियोजनादीनामिथः प्रत्यासत्त्यनुग्रहाय पयस्यपशोः प्रथममुपाकरणं तस्यैव
प्रथमं नियोजनं कार्यमिति प्रवृत्तिक्रमो व्यस्यते इह तु नैत्त्रिरीयशाखागतानां पंचानां मंत्राणां परस्पर
प्रत्यासत्तिने शास्त्रविहिताभिन्नप्रधानकत्वात् साद्ध्वक्रमस्य च प्रधानक्रमवशासंपन्नत्वात् एवं शाखा
न्तरमंत्राणामपि यदि हि समाचोदितास्युः तदा शाखगामंत्राणां समुच्चयवत्वाहेक शाखागतमंत्रयो ८५
र्मध्ये शाखान्तरमंत्रप्रयोगावश्यंभावात् एक शाखागतस्य प्रथमस्य शाखान्तरीयेक व्यवहिता
प्रत्यासत्तिर्यौ त्यानतस्य एकशाखागतमंत्रेण प्रथमप्रयाजमनुमंत्र्य शाखान्तरीयेणापि तमेवा
नुमंत्र्य शाखान्तरीयेणैव द्वितीयप्रयाजं प्रथममनुमंत्र्य पश्चात्स्वशाखीयद्वितीयमंत्रेणानुमंत्र
णे एकशाखागतयोः प्रथमद्वितीययोर्मध्ये शाखान्तरगतमंत्रद्वयापत्त्या प्रागुपपादितशाखान्तरी
येकमात्रव्यवहितप्रत्यासत्तिपरिग्रहबाधः स्यादिति प्रवृत्तिक्रमाश्रयः स्यात् न त्विह तथा प्रत्यासत्तेः
प्रमाणमिति भावः। क्रमेणाप्रवर्तवहनियम इति प्रस्तवस्थानात् श्रुतार्थापेक्षया जपन्यप्रमाणत्वात् द्वासं श्री एम:
गतिः। यथापाठमिति स्वाध्यायाहतु लिंपेदुंजीतेत्यादौ पाठक्रमेणात्र स्थानक्रमप्रतीतेरिति भावः। अन्य

तः प्रतीत्याप्यानुष्ठानमाशंक्याह स्मृतिरिति प्रयोगे पदार्थस्मरणं हेतुः तच्च वेदवाक्येनैव संपाद्यं वा
क्यं च स्मृतेः पदार्थस्मारकं वाक्यस्मृतिरपि यथापाठमिति पाठक्रमेणानुष्ठानमित्यर्थः द्वितीयपादं व्या
चष्टे क्रमेति न तु वाक्यस्य विधायकत्वात्त्याथमिकक्रमावबोध एव प्रयोजनं न प्रयोगकाले स्मरणमि
त्याशंक्योत्तरार्धं व्याचष्टे वेदादिति अध्ययनविधिना क्रमविशिष्टवाक्याध्ययनविधानात्तस्य च क्र
मांशे दृष्टार्थत्वाय प्रकृते स्मरणस्य वाक्यजन्यत्वनियमो यथावगति नियमश्चांगीकर्तव्यः इत्यभिप्रे
त्य पाठक्रमस्य दृष्टार्थत्वमुपपादयन्नाद्यपादं व्याचष्टे स्वाध्यायेति सूत्रे एककर्तृगतत्वे पाठक्र
मेणैवानुष्ठानं नियम्येन तस्य गंधप्रख्याद्ये पदार्थक्रमबोधकतया गुणत्वावगमात् ॥ प्रवृत्त्या प
ञ्चानां भेदेनानुष्ठाने सहानुष्ठाने प्याराद्उपकारकवत्सन्निपातिनां तंत्रत्वे आह तावपि कांडानुस
मये विचारानुपपत्तेः सहत्वसन्निपातिनां आह त्रिते षां पदार्थानुसमयं च दर्शयति वाजपेय इति
बृहस्पाम इति द्वितीयपाद इति शेषः। यतः कुतश्चिदिति इच्छाया एव नियामकत्वादिति भावः संगात्तेस्स
वयन्नाह नियामकाभावादिति सिद्धांतमाह प्रवृत्त्यावेति अन्यायेन· प्रथमपदार्थे प्रवृत्तिक्रमेणाद्वि

भा॰ दी॰ तीयादेरनुष्ठाने प्रतिपदार्थं षोडशभिरेव व्यवधानं भवतीत्यर्थः प्रथमपदार्थानुष्ठाने यः प्रथमस्तस्य
पशोः सर्वान्ते द्वितीयपदार्थानुष्ठाने द्वात्रिंशता व्यवधानं द्वितीयपशोः सर्वान्ते द्वितीयपदार्थानुष्ठाने ए
कत्रिंशतैवमति व्यवधानं स्यादित्यर्थः ननु नायं दोषः अन्तिमपशोः प्रथमं द्वितीयपदार्थानुष्ठा
ने यथोक्तसन्निकर्षस्यापि लाभादित्यत उक्तं अनुज्ञाताधिकेति षोडशभिर्व्यवधाने शास्त्रानुमत
६५ मिति तन्न्यूनमप्यधिकं चेच्छास्त्रीयमिति भावः। नन्वेककालत्वमेव शास्त्रार्थो न प्रत्यासत्तिरित्यतो
व्याचष्टे। एकैकस्येति वचनेति बहुवचनेत्यर्थः। कृतं व्याइति एककालत्वे शास्त्रोक्ते एककरणोक्त से॰
त्वेन शक्यत्वानैरन्तर्येण पर्यवसानादिति भावः। सत्त्वे तुल्यकालानां नियोजनादीनां प्रहस्याक्रमो नियम्ये
तत उपक्रमात्तेषामङ्गानां प्रधानसमीपेऽनुष्ठाननियमादङ्गानां प्रधानप्रत्यासन्नानुष्ठानत्वादिति या
वत्॥ स्थाना॥ प्राथम्यादग्नीषोमीयस्थाने साहित्ये विचारानुपपत्तेराह साहित्यं चेति स्थितमिति श्रीएम्॰
रतीय इति शेषः यद्यपि तत्र श्येनयागे श्रुतस्य साहित्यस्य सवनीयस्थानत्वमुक्तं तथापि न्यायः समा
न इति भावः यस्य प्रथमोपस्थितिस्तस्य प्रथममुपाकरणं सा च सवनीयस्यैवेति सिद्धान्तयति श्री

ग्निनेति नन्वेवमुपस्थितिरेव क्रमे नियामिकास्यात् न तु स्थानमित्याशंक्य तत्स्थाः स्थानाधीन
त्वात्तद्देवतानामित्याशयेन श्लोकं व्याचष्टे अग्नीति। अग्नीषोमीयप्रणयनानन्तरमाग्नीषोमीय
पशोरनुष्ठानकाल इत्यर्थः। अस्तु: अग्नीषोमीयः पशुः तेनाग्नीषोमीयप्रणयनेन। अत्रेति। आग्नि
नोत्तरकाल इत्यर्थः अग्नीषोमीयानुबंध्यविषये आचार्यकृतविचारान्तरे पूर्वपक्षमाह इतरयोरि
ति सिद्धान्तमाह अथवेति स्तत्रैव तत्सन्निसंयोगादाग्निनयहोत्तरकाललक्षणसवनीयस्थान
स्य प्रकृतत्वादाग्निनयहं गृहीत्वेति सवनीयोत्सन्निदध्यायामेव गमाहित्यर्थः॥ प्रख्या॥ याज्येति प्र
णो देवी आ नो दिव इति स्त्रीदेवत्यानुवाक्या याज्ययोः पाठानन्तरं पीपिवांसं सरस्वतः स्तनं सरस्वत्
मे य इति पुंदेवत्यानुवाक्यायाज्यापाठादिति भावः। प्रवृत्तिक्रमादेवात्र क्रमसिद्धेर्नैर्हेतुत्वक्रमो
दाहरणमिति शंकते नन्विति पूर्वप्रवृत्तोपाकरणस्य पश्चाज्ज्ञाविनियोजनादौ क्रमनियामकत्व
मुक्तं न तु पश्चाज्ज्ञावियाज्यानुवाक्ययोः पूर्वप्रवृत्तनिर्वापादावितिशंकते पूर्वेति। नानुष्ठानका
लनिष्पन्नाप्रवृत्तिः क्रमनियामिका किं प्रयोगविधिप्रवृत्तिर्दध्यायां प्रतिसंहिता प्रवृत्तिः प्रत्या

तु

३१ ५

प्रा॰टी॰ सत्यन्तु याहकत्वेन क्रमनियामिका नान्यतिसंधानं च पूर्वपदार्थोपस्थितो न्नरेषु पि समानमिति परिहरति न
प्रत्यासत्तीति किमिह मुख्यक्रमस्य नियामकत्वेन संभवति किं चान्यथासिद्धेर्थेन तस्य प्रमाणत्वेन सं
31 भवतीति तत्राय आह सत्यमिति द्वितीयं शंकते अन्यत इति तद्धेतुः हि तिप्रवृत्तिक्रमादेरेव हृन्नाविप्रक
र्षप्रसंगात् मुख्यक्रम एव न्याय्य इति वक्ष्याम इत्यर्थः एवं हीति। यागद्वयस्य महानैषेयत्वे देकैकस्ये
केकपाकौ यव्यवहितप्रत्यासन्नत्वं शास्त्रानुमतेन तत्र मुख्यक्रमादरे सिध्यति नत्वंगादेरनुपस्थाप्यं विप्रधा
नांगस्य प्रथममनुष्ठानेन तस्य प्रथम भावि प्रधानेन न तदंगेन च व्यवधानात् पश्चाद्गा विप्रधानतदंगयो
रत्यंतव्यवधानं स्यादित्यर्थः ननु प्रवृत्तिक्रमेपि प्रत्यासत्तेरेव नियामकत्वात् कथं प्रमाणभेद इत्यत आ
ह तस्मादिति॥ प्रवृत्तौ॥ मुख्यक्रममाहाग्नेयेति इदं चोपलक्षणं अग्नीषोमीयनिर्वापानंतरं आज्य
निर्वापः प्रतिज्ञ इत्यपि बोध्यं तेनेति प्रधानार्थत्वादंगानां प्रधानानुसारेण क्रमो न्याय्यः तथा पूर्वाधि एष:
करणेन प्रधानप्रत्यासत्त्यनुग्रहाद्धिपि स एव युक्त इति भावः अत एव संगतिः मुख्यक्रमं च्चाद्दौ प्रमा
णांतरेणावगतस्य तत्पश्चादंग क्रमस्यानुमेयत्वात् प्रत्यक्षपाठ गम्य क्रमस्य तु प्रत्यक्षेणैव ततः प्रा
ले ॥

बल्यं प्रधानप्रत्यासत्तिरपि अंगानामंगत्वं तत्रकालत्वादंगप्रधानपाठानुक्रमप्रयुक्तस्यैवावगतेस्तद्विरोधे
नैवसौ कार्येत्याशयेन सिद्धांतमाह पाठनास्त्विति सर्वे प्रकृतौ येयथापाठक्रमं निर्वापक्रमः प्रतीयेत पाठ
क्रमस्य स्वशब्दत्वात् अंगावगमकश्रवणधर्मत्वात् प्रत्यक्षेणाश्रियावगमादिति ॥ मंत्रापेक्षिकां संग
तिमाह इदानीमिति। उत्पत्त्यधिकारे एवं च प्रथमावगतत्वाद्यथा पूर्वं च पाठक्रमस्य प्राबल्यं एवमि
हापीति प्रत्यवस्थानात्संगतिः मंत्राणामनुष्ठेयावस्थपदार्थस्मरणाय प्रयोगकाले उच्चारणेव
श्यंभावात्प्रथममंत्रः उच्चारितो हि द्वितीयमंत्रे स्मारयितेति न स्याच्च द्वितीयपदार्थस्मरणमिष्टादिति भव
ति ब्राह्मणानां तु विधानमात्रार्थत्वान्न प्रयोगकाले समुच्चार्यमिति न ष्टादिति पदार्थस्मारकं किंतु पदा
र्थानुष्ठानानंतरं अयं मयानुष्ठित इति प्रथमे पदार्थे आलोच्यते पश्चादयमनेन विहित इति तद्विधायक
कवाक्यस्मृतिः नेनचनकुत्रस्वावाक्यस्मृतिः न तत्स्मृतिहितार्थस्मृतिस्तत्र तदर्थानुष्ठानमित्येवं विलंबस्त
त्रापि तदर्थस्वरूपमात्रस्य स्मृतिः मंत्रानुष्ठेयावस्थस्येति मंत्रक्रमस्यैवानुष्ठानसन्निकर्षात्प्रा
बल्यमित्याह मंत्रास्त्विति। तद्भाव इति मंत्रागतसन्निकर्षः सोऽद्भाव इति भावः। सत्रे मंत्रब्राह्मण

क्रमविरोधे मंत्रपाठक्रमात्पदार्थक्रमः स्यात् प्रयोगसामर्थ्यान्मंत्रस्य प्रयोज्यपदार्थस्मरणसाम
र्थ्यात् ब्राह्मणपाठस्तु उत्सन्नदेशः इति न प्रयोगकालिकस्मरणस्योपयुक्तः ॥ तद्धि ॥ औपदेशिकक्रमयो
र्बलाबलविचारानंतरमौपदेशिकातिदेशिकयोः साद्विचारानंतरं गतिः । आग्नावैष्णवधर्माणां सोमौषधा
नां प्राथम्येन विचारस्तत्र चोदकप्रयोगवचनयोर्विमत्यभावात् । अत आह बार्हस्पत्यस्य योरिति चोद
केति प्रकृतावाज्यधर्मेभ्य औषधधर्माणां पाठतः प्राथम्यादिति भावः । तत्रेति चोदकात् प्रयोगवच
नोऽदुर्बल इति द्वादशे वक्ष्यमाणत्वेऽपि क्रममात्रविषये स एव प्रबलः सर्वत्र क्रमस्य प्रेरणदधीन
त्वादिति भावः । प्राप्तानामिति पदार्थप्राप्त्यधीनत्वात् प्रयोगविधेस्तत्प्राप्तेश्चोदकाधीनत्वात् चो
दकोपजीवितया प्रयोगवचनोऽदुर्बल इति भावः । ननु शरमयं बर्हिरित्यत्र बर्हिः कार्ये शरविधाना
र्थं तत्कार्यप्राप्तये चोदकस्योपजीव्यत्वेऽपि कुशप्राप्तेरनपेक्षितत्वात् चोदकप्राप्तकुशबाधवदिह पदा
र्थप्राप्तये चोदकस्योपजीव्यत्वेऽपि स्वयमेव पाठक्रमेण मुख्ययोः क्रमं विधायतत्क्रमेण पदार्थेषु क्रमं
कल्पयतः प्रयोगविधेः क्रमविषयचोदकानपेक्षत्वात्तेन चोदकप्राप्तक्रमबाधः किं न स्यात्तत्रा

श्री एम:

ति·

ह नैराकांक्ष्यादिसंये क्रमकल्पनप्राप्तस्यापि प्रयो गविधेः कल्पनामूलोच्छेदनात्तन्नक्रमोतरं

कल्पकत्वमिति क्रमविषयेपि सद्वैवलं इति भावः ॥ द्वितीयश्लोकं व्याचष्टे प्रथममिति सूत्रेविहितोयथाप्र

धानेक्रमः स्यात्तु पदार्थानां यथाप्रधानंक्रमवचन प्रयोगविधिवलात् ॥ विकृ० । इहापि चोदक एवानु

ग्राह्य इति संगतिः यथा यद्दर्शपौर्णमास्यादिकालविधानादितरासामपि विकृतीनां सद्य

स्कालत्वं एवं श्रातशादिकालविधानादेतासामपि सद्यस्कालत्वं किं न स्यात्तत्राह श्रातश्रुतेरिति । न

नु तत्रापि श्रमागस्यादि श्रुतेर्न विरोधः अंगप्रधानयोरन्यतरत्राभावात्स्यात्संबंधमात्रेणानकुर्यात्स्य कुं

वपन्नेरिति शंकां निराकुर्वन् व्याचष्टे यद्यपीति कालस्याहि प्रयोगापरनामधेयसांगप्रधानभावनयान्वया

दंगप्रधानयोरेककालत्वमेकादशे वक्ष्यते तद्विरोधाद्वैयदेशिकैककालत्वबाधाद्दातिदेशिकद्यह

कालो बाध्य इति व्याचष्टे विकृ० षिंतेति · द्यहकालत्वं न्यायेन क्रमः सद्यस्कालत्वे चान्य इत्यध्या

पत्तेः संगतिः सत्रेष्वहर्निर्द्यहकालत्वयात्रिश्रात तथा नीकृत्यस्यादिपितत्कालस्यान्विकृतेः प्रकृतिध

र्मत्वात् । अंगम ॥ प्राजानामिति अग्नीषोमीयात्पूर्व्वतेविद्याप्राशनानेतरं प्राशानामिति विशेषः स्व

२ २२

श्रा०दी० स्थानात्पूर्वत्वमपकर्षः ततः परत्वमुत्कर्षः प्रधानेति· प्रयाजानां पूर्वेषामनुयाजानामुत्तरेषां च पदार्था
नां प्रधानप्रत्यासत्तिबाधो न भविष्यतीत्यर्थः पूर्वेत्यत्र श्रूयतु यथानेष्वान्तरादौ सांगकर्मानुष्ठानवत् अ
33 त्रापि श्रुतमात्रोत्कर्ष इति संगतिः श्रुतिं स्वार्थमात्रबोधिकी नान्योत्कर्षापकर्षौ वारयति प्रधानप्र
त्यासत्तिश्च प्रयोगवचनगम्यासन्निवोदकाद्दुर्बल इति न देवगतक्रमाविरोधिनी मेवांगानां प्रधान
प्रत्यासत्तिं बोधयत्यतश्चोदकावगतक्रमानुरोधेन न तदंतापकर्षश्चेत्याशयेनाह पूर्वेरोति·
सूत्रे उत्कर्षः अपकर्षस्याप्युपलक्षणं ॥ ३२ ॥ प्रातरिति प्रातरनुवाक्यानुवाक्या कार्यं प्रातर्याव
भ्यो देवेभ्योनुब्रूहीति प्रैषमित्यर्थः प्रचरणीजुहूसदृशीपात्रविशेषः तत्साधनकः प्राचरणीत्यग्निः
समिधाहवमितिमंत्रकरणको होमः सौमिकानामेष्टिकानां च स्ववातंत्र प्रयोगवचनभेदेपि मह
प्रयोगवचनैक्यात्क्रमप्रसक्तिः एतेषां तार्इतित र्तोताः नतु प्रैषसहिताः तदानीं प्रोक्षणावह श्रीराम:
ननादिधर्मनेष्टुपुरोडाशस्येवाभावात् तदलंकरणस्याभिधारणाद्यस्यासंभवादिति ध्येयं नाध्व
र्योरिति नतु प्रोह्मणाह्निकमपि प्रतिप्रस्थातृकर्तृकमेव तत्र द्वयोर्होत्रापठ्यमानत्वात् तरतुवाकस

मात्रिपर्ययेनंहेतुः समीपेऽभ्यासितव्यमित्येवं प्रातरनुवाकोपक्रमो व्याहृतः । नात्रद्वीपपुरुषस्य प्रतिप
स्थानुरेवकोक्षणादौ प्राप्तिरिति चेन्न उपास्तेर्वैकल्पिकत्वेन यस्मिन् पक्षे सा नास्ति तस्मिन् पक्षे इदम
धिकरणमित्याकरे स्थितत्वात् ॥ निर्वापव्यवहितानामिति निर्वापैषव्यवहितानामित्यर्थः । एवं च
सर्वत्रानुयाज्यानंतरं सूक्तवाकाद्युपस्थितिनियमात् तेषां तदानंतर्यनियमेपि नेह निर्वापानंतर्यनिय
मः उपस्थितिनियमाभावादिति संगतिः सर्वेषां तत्कालानां पदार्थानां प्रवृत्त्या नियमः स्यात् प्रकृत्य
स्था०प६ मानएव हि पूर्वः पदार्थः उत्तरपदार्थमुपस्थापयति अग्रसो पूर्ववदिहापि पूर्वः पदार्थः उत्तरपदार्थस्योपस्था
पकः पाठतः क्रमेसति तदुत्क्रमत्वाविशेषादिति संगतिः अग्नीति ओपवसथ्येहनि शालामुखीया
ग्नेः प्राग्वंशगतसोमस्य च अग्नीषोमीयहविर्धाने च प्रणयनानंतरमित्यर्थः नत्वंगमित्यन्वयः भि
न्नेतिनचमहाप्रयोगवचनैकात्म्यमापेक्षेति वाच्यं एकापूर्वसाधनानां हि केन क्रमेणानुष्ठाने
पूर्वं भवतीति क्रमापेक्षा अननुष्ठाने च प्रयोगः तेन तत्तदपूर्वसाधनानामवांतरप्रयोगो भिन्नो भिन्न
एव महाप्रयोगस्तु अपकर्षविधानानंतरं वर्ततेऽत्यपकर्षे द्वारायामभावात्तत्तदंतापकर्षे हेम

 इति भावः। सत्रे वैकृते प्रतिकृष्यमाणेन हविषा निकृष्यते न तदंतस्य पूर्वैः सह क्रमलक्षणसंयोगाभावात्।
प्राप्तेः। प्रसज्यत इति सवनीयपशुप्रयोगस्य सवनत्रयव्यापित्वात् तेनाभ्यो विहितेषु सवनीयपुरोडाशेषु
सवनीयपश्वाद्यनुष्ठितांगजातस्य प्रसंगादुपकारकत्वादिति भावः। दाक्षिणाग्निकौ दाक्षिणाग्नौ कृते
व्याविति यावत्। कर्तव्याविति पशाविविधमानत्वात्प्रसंगादुपकाराभावे सति पौरोडाशिकप्रयोगवि
धिनानयोः पुरोडाशार्थतया कर्तव्यत्वबोधनादिति भावः। प्रकृताविति दर्शपूर्णमासयोरित्यर्थः। अ
तएव पूर्ववैषम्यात्प्रसंगतिः अन्याज्ञानां पुरोडाशार्थानुष्ठानस्याभावेपि तदुपकारक[illegible]त्वात्त
दुत्कर्षेण तदा घृत्कर्षः स्यादिति भावः। प्राभ्युकेशिति प्राभ्युकानामुपकारकत्वेपि उपकाराणां संभूयेय
वा ४ हणाननेषु क्रमापेक्षाभावे उपकारकपदार्थेषु क्रमापेक्षात्वे चात्र परकोयं तेनेः पौरोडाशिकयोः
क्रमांगे यस्य पौरोडाशिकैः क्रमांगं संभाव्येत न तेषामत्रानुष्ठानमुत्कर्षोस्ति येन तदा घृत्कर्षः स्या
दित्यर्थः। प्रत्यक्ष संगादुपकारकं प्राभ्युकं॥ तथा एकेति अनेन पूर्ववैषम्यात्प्रसंगतिः अमावास्यायां श्रीराम:
हविरभिवासनं कृत्वा वेदिः कर्तव्येत्येवं क्रमक्लृप्तेः पूर्वमेव वेद्युपकर्षविधिप्रवृत्तेरक्लृप्तक्रमत्वात्

न्मात्रस्यैपकर्षइत्याह मामान्येनेति। श्रुतं कत्रिगमं श्रोतस्यैति पूर्वेद्युर्वाक्यस्य क्रमविधिपरत्वेन स्व ५५
परशाद्यविहितत्वादिति भावः। तावदिति। तत्र श्रूयमाणः क्रमः पौर्णमास्यामेव स्यादिति भावः। अभिवासनेपौ
र्णमासमभितो ग्नेरवस्थापनेम न्त्रे चेत्र प्रकृतिं सर्वकर्मपरेण शब्देन अत्र क्रमः क्रमत्वमुपलक्ष्यते तादृशी
वेदिकावन्यापकेरणां प्रासंगिकर्षेदिति। मांता। तस्याइति यद्यपि तत्राग्निहोत्रकरणं तोसांतपनीया प
दार्थानां क्रमहानिः क्रियते तथाप्यग्निहोत्रवत्सहार्थं वैगुण्याभावेनात्पर्यं प्रणयन लोप इति मांतनीयार्थे
प्रागेवाग्नेः प्रणीतत्वेन सायंकालेषु न राग्निहोत्रार्थं प्रणयनासंभवादिति भावः सांगेति। कालस्यैका
दृशन्यायेन प्रयोगान्वयादिति भावः। जघन्यत्वेनेति अत्रेन सर्वे जघन्यपाठक्रमवदिह जघन्यका
लबाधइति संगतिः। स्वविता निमित्तविशेषणत्वात् निमित्तजीवनं तत्र सायंकालादेर्विशेषणत्वाद्दत ए
व निमित्तस्यैवाधिकारिविशेषणत्वात्पदा कालस्यापतति तदा कर्मकर्तव्यमित्येवमर्थादधिकारिविशे
ए२ षणत्वपर्यवसानादित्यर्थः। सत्रे सवनवत्तथा प्रातस्सवनमुत्कृष्यमाणं माध्यंदिनसवनमुत्कर्षेत्तथोत्क
र्षेदितरथा प्रणयनाभावेन वैगुण्यात्॥ षोड॥ काँक्तनपदार्थबाधे क्रमबाधः कैमुत्यात्सिद्ध इति संगतिः

ल१

प्रातिस्विककालरहितानामेवांगानां प्रधानकालत्वमित्यस्य हेतुमाह यहं चेति न चास्य सामान्यविषय
स्य षोडशिस्तोत्रव्यतिरिक्तविषयत्वमिति युक्तं विरोधाभावे सामान्यस्य सर्वविषयत्वादिति भावः।
समये यति। अर्धास्तमिते इत्यर्थः। ननु तं परं चमिति षोडशिग्रहणस्यैवाक्यवपरभावो विधीयते ग्रह
णं चागमेव न प्रधानमित्यत आह तपरं चमिति। अगृहीतायागायोगाद्ग्रहणस्यावदानवद्यागोप
क्रमरूपत्वाच्च ग्रहणस्याक्यवपरभावो यागाभ्यासस्यैव पर्यवस्यतीति भावः।। ।।इति श्रीचंपकनाथ
कृतौ शास्त्रदीपिकाव्याख्याने प्रकाशाख्ये पंचमस्य प्रथमः पादः।।१।। ।।श्रीरामः।। पूर्वस्मि
न्पादे श्रुत्यादिप्रमाणैः क्रमो निरूपितः इह तस्यैव क्वचित्पदार्थानुसमयः क्वचित्कांडानुसमय इ
ति विशेषपर्यवसानव्युत्पादनासादामरत्वमानेन यंचैवैश्वदेवीमिति चरंतीत्यनुष्ठानपर्यायप्रयोगाभि
धानात्प्राजापत्यैरिति तंत्राभिधानेन साहित्यावगमात्तत्वाच्च प्रत्ययेन वैश्वदेव्युत्तरकालत्वावगमाच्च एक
स्मिन्काले सर्वेषु भावः सहप्रयोक्तव्या इति विहिता इत्यर्थः कांडेति कांडपदार्थवर्गः अनुसमयः पश्चा
त्संगतिः इण् गतावितिधातोस्तस्याचैकस्य पशोः कृत्स्नमुपाकरणादिपदार्थवर्गं कृत्वा अपर

श्रीरामः

स्यत्तथा कर्तव्यमित्यर्थः। आनंतर्यनियमे एवमिति तत्र च क्वचित्सौर्णमास्यां पौर्णमास्यायजेनेति का
लविधानेन क्वचित्प्राचीनप्रवणे वैश्वदेवेन यजेतेति देशविधानेन क्वचित्फलगामिगतत्वेनाभिधा
नानुसारिप्रयोगवचनेनैव अनेकेषां प्रधानानां सांगानां साहित्यावगमात्तन्निर्वाहाय पदार्थानु
समय इति भावः। अत्रापि इष्ट्यादिविरोधात्पदार्थानुसमय एवेति घोतयितुं शत इति तत्रापि निरूप
इत्पदार्थानुसमय एवेति घोतयितुं श्रयमाणेष्टित्रयप्रयोगप्रदाने निमित्ते चतुष्कपालेष्टिर्विधी
यते तत्र च यावन्त इति विधेयसंख्योपलक्षणार्थी भूतनिमित्ते यत्राशनिपातहनेनैव नैमित्तिकयज्ञाया
अवयवत्वात्स्वगतविषयतया मन्त्राद्यवसायप्रदेशमनोये नयजेरन्निति तत्र बहुत्ववत्त्वं तु कपाल
बहुत्वस्याविवक्षितत्वात् यावन्तोऽग्नय इति बहुत्वस्य च निमित्तगतत्वाद्वा विवक्षितत्वात्। यावन्तोऽग्न्या
धानवत्संख्येष्टिः कार्येति वा साहित्यस्याविवक्षितत्वात् सह प्रयोग इति कोऽनुसमयाद्यप्रसक्तिः
तथापि साहित्यविधायकमन्त्राकरे समार्थ्ये नमिति भावः। सत्रेषु प्रधानानां साहित्ये एकैकस्य प्रधानस्य गु
णानां कान्वयेन क्रियास्यात्।। सुष्टि।। पदार्थानुसमयप्रसंगात् क्रियानेकः पदार्थेति चिंतेनेति संगतिः

६०

 किमिति अयं च फलसंशयः अधिकरणांगसंशयस्तु किमेकमुष्टिनिर्वापः इत्यस्य पदार्थः उत चतु
र्मुष्टिनिर्वाप एक पदार्थ इति पर्तीभावः । प्रयत्नः एवं च एकमुष्टिनिर्वापः एकः पदार्थ इति लोकमत एव
निश्चित इति भावः । पदार्थो संगं अंगत्वं च शास्त्रैकगम्यं शास्त्रं च चतुर्मुष्टिनिर्वापस्यांगत्वं बो
धयतीत्याह अंगत्वमिति चतुर इति चतुर्भिर्मुष्टिभिर्व्रीहीन्निर्वपतीति संख्यामुष्ट्युभयविशिष्टनि
र्वापविधानादिति भावः न च निर्वापस्यार्थात्सिद्धेर्नैविधिरिति वाच्यं यागोपयुक्तमात्रव्रीहि
मतस्तदप्राप्तेर्न च द्वितीयया मुष्टीनां प्राधान्यात्प्रतिमुष्टिनिर्वापावृत्त्या चत्वारो निर्वापाः स्युरि
ति मुष्ट्यनुसमय एवेति वाच्यं मुष्टीनामप्राप्तत्वेन तद्दर्शनया निर्वापविध्यसंभवात्चतुःसंख्यापात्र
प्राप्ततया अन्यतरानुवादेनान्यतरविधेरप्ययोगात्समुच्चितद्वितीया भजनीयेति भावः एवमिति
कपालान्युपदधातीति कपालानामुपधानसंस्कार्यत्वमंगत्वविशेषणं न कपालत्वविशेषणं वा अष्टाक श्रीराम॰
पाल इति मिलितानामेवोपधानं न चैवं युगपदुपधानप्रसंगः प्रतिकपालं मंत्रभेदेन प्रत्येकमुपधा
नोपपत्तेरिति भावः । एवं व्रीहीनित्यादावपि अवघातीत्यनयोर्द्वितीयाविशेषावघातीति वा समप्रा
मिलितानामेवावगम्यत इति २ अंगत्वं २

ग्नावदानोद्देशेन देशमात्रविधायकत्वं नावदानविधायकत्वमिति नैकैकावदानं शास्त्रार्थः किं तु
द्विरवदानमेवेति भावः। एवमिति। त्रिरंक्ते त्रिरभ्यंक्ते त्रिर्वपति एकविंशत्या पवयतीति तन्त्रसंख्या
युक्तानामेवाज्ञेनाहीनो यजमानसंस्कारकत्वात् द्विवद्यजमानककुलाया हीनाद्विरुक्तावत्संख्या
कांक्षनाद्यनुसमयो न प्रसेक्कमित्यर्थः। संय॥ ननु पूर्वत्राप्यवदानेनानुसमय उक्तः इदानीं प्रदानां
तेनेत्यनर्थोहनमतन्त्राह तत्रेति पूर्वत्रावदानोदाहरणे एकैकावदानानुसमयनिषेधमात्रे तात्प
र्येन तुह्यवदानानुसमयेनेतो न दोष इति भावः। प्रदानांतेनेति। प्रक्षेपांतेनेत्यर्थः। यथा च तुर्मुष्टि
निर्वापविधानाभावत्तानुसमय एवमिहापिह्यवदानानुसमयश्चेति संगतिं सूचयन्नाह तत्रेति स
र्वेप्रधानाधिकरणे होमस्यावत्तसंस्कारार्थत्वोक्तेस्तदनुरोधेन चतुरवत्तवाक्ये अवदानानुवादेन
होमो विधेयः तथा च होमविधिनोऽवदानस्याप्राप्तेर्द्विरिति वाक्यस्य होमविलक्षणापादानद्विसंख्या
मयविशिष्टावदानविधिपरत्वावगमेन भावादवदानमेव पदार्थ इति भावः। नैवमिति। चतुरवत्तवाक्ये
वदानविशिष्टहोमो विधीयते तत्र चावदानस्य होमार्थत्वेपि होमस्यावत्तसंस्कारार्थत्वं विरुध्यते

शा० टी० ततश्चावदानविशिष्टहोमविधिनाऽर्थादवदानस्य विशेषणस्य प्राप्तेर्द्व्यवदानवाक्ये नतोऽद्विधायकमि
त्यर्थः। अवत्तहोमावदानविशिष्टहोम इति यावत्। विशेषमात्रस्येति द्वित्वसंख्यामात्रस्येत्यर्थः
चतुरवत्तवाक्ये जुहोतिना यागाप्रावेऽनप्रक्षेपावत्तसंस्कारो विधीयते नायं प्रक्षेपो वत्तस्यैव
37 भवतीतरथा होमस्येतत्संस्कारत्वानुपपत्तेरतो हविषोपादानस्यार्थप्राप्तेर्विषडित्यपवाद इति
भावः। एवं दानवाक्ये वदानविध्यंगीकारेपि चतुरवत्तहोमावयवत्तयाविधानान्न पृथक्पदार्थ
मितितिना नादीजाधिकरणालभ्यं प्रदानान्तानुसमयमत्रबुद्धिसौकर्यार्थमाह यद्यपीति एव
मुपस्तरणाभिघारणयोरपि न पृथक्पदार्थत्वं चतुरवत्तावयवत्वेन विधानादिति बोध्यं। सूत्रेव
दानसंयुक्ते होमे विधीयमानेतत्स्य होमार्थत्वात्तेनैव होमग्रक्रमहोमान्तरं तद्द्व्यवदानं स्यात्॥
वच॥ यूपगणा इति यूपैकादशिन्यादिष्वित्यर्थः पूर्वेणेति पादाद्यन्यायेनेत्यर्थः तथैव वक्त श्रीराम:
व्येऽयानेकः पदार्थ इति न्यायात् इति शेषः। भिन्नदेवतानां एकादशिनादिपशुगणानां ततवि
षयत्वं तत्त्वेकस्य पशोर्देवतमो विष्टकृतेकान्त्यवदायदैवतस्य होमं कृत्वापश्चान्तरस्यापितस्यैव

२ निर्णयस्य पदार्थानुसमयफलत्वयान्यायस्य पूर्वपर्यन्तानुवृत्तेः संगतिस्फोरणार्थं पूर्वेणेत्युक्तिः। नियोगत इति- अध्वर्योरिति कुशलले
साहाय्यानपेक्षणात्वतिप्रसक्तात्रादिनापि साहायकाचरणं ... ॥प्रागितिः॥ × २

कर्त्तव्यत्वेनतत्र पूर्वोत्तरपक्षयोरप्रवृत्तेः अन्यथात्वद्धामन्यदेवताकहविर्मेलनेन विपर्यासप्रसंगात्
एकदेवताशेषाणांतु प्रधानस्यतंत्रतयानविपर्यासदोषः अतएवसंप्रतिपन्नदेवताकेसान्नाय्या
देश्चवदानस्यनप्रदानांततेतिचतुरवदानमात्रस्यानुसमयस्तस्मादेकदेवताकाः प्राजापत्यादर
यएवविषयइत्याह एकदेवत्येष्विति। पूर्ववदिहापिकांडानुसमयइतिसंगतिः अग्नीषोमीयेतिनतुवचना
त्देवतान्यवदायेतिल्यपानतावत्सेवहोतव्यमित्यनेनान्यायादवदानस्यन्यायप्राप्तप्रदाना
नंतर्यानिषेधमात्रापेक्षीणत्वादितिभावः। नन्वेवमपिप्रकृतौप्रयोगवचनेनबोधनाद्वाचनिकमे
वानंतर्यमित्यतोव्याचष्टेयावंतइतिप्रयोगवचनस्यपेक्षयात्वाः पदार्थास्तेनिरंतरंकर्त्तव्याइत्येता
वन्मात्रेतात्पर्याद्देवतादीनांनप्रातिस्विकरूपेणानंतर्यबोधितमित्यर्थः सत्रेएकैकस्यदेवताहित्रि
कमवजेयेत्प्रतिव्यक्तिपस्त्वेकत्वात्तथात्रकृत्यैकैकत्रत्रिकस्यप्राप्तेः॥ ॥नान॥ तंत्रावापचिंता
क्रमाध्यायासंगनेत्याशंक्याहफलेति॥ विधिभेदेनेति। ततश्चपूर्ववदिहापिप्रत्येकमनुसमयइतिसं
गतिः सिद्धांतमाह तंडुलेति सर्वप्रसेएकस्मिन्नेवकृष्णाजिनेबहूनामुलूखलानामधिवर्त्तनं

प्रा० दी० संभवाद्वैकेनैवमुसलेनमूर्धपरणच पर्यायतोऽवहननपरापवनादिसिद्धेर्मुसलादीनांतंत्रत्वमेवेत्याशये
नसूत्रेउलूखलमात्रग्रहणं॥विका॥देशेति। अपूर्वावुपस्थितौसनेनचतुर्गृहीतेजुहोतीत्यनारभ्यावि
जा३ धिप्राप्तप्रयाजानूयाजार्थचतुर्गृहीतद्वयमपूर्वसंख्यालक्षणयानूयादतत्रउपभृत्पात्रविधिरितिपक्षेपा
त्रेकसाक्षाद्विधेयत्वादेवसिद्धेर्योगपद्यंतुचतुर्गृहीतद्वयस्यशाब्देनानवहितमुचितेपिपक्षेपूर्वसंख्यालक्ष
णयान्तदनुवादस्वारस्यबलादेवसिद्धंउपभृदादिविशिष्टग्रहणविधिरितिपक्षेचउपादेयत्वेनोपभृ
त्संख्याविवक्षितत्वादेकोयोगपद्यंतुपूर्ववल्लक्षणाबलाद्विधीयमानचतुर्गृहीतद्वयस्याहि
त्यबलाद्वासिद्धमितिभावः। असंकरइतिदृष्टार्थोपवननविध्यवगतद्रव्यांतरासंसर्गइत्यर्थः। पू
र्वत्रोलूखलेकवदिहोपभृदैक्यमितिसंगतिः। श्रुतत्वादितिविकृतोशास्त्रारणमप्यातिदेशादिति
भावः। ग्रहणंगत्वादितितत्रउभयोरपिअन्यांगत्वात्परस्परंगुणप्रधानभावाभावात्तुल्यब
लत्वमेवेतिभावः। यत्तुश्रुतत्वादितित्राह विकृतोचेतिश्रुतत्वेहिउदितिप्राप्तिद्वाराप्राबल्यहेतुः श्रीराम:
नत्वप्रकृतावेवविकृतोनूपकारस्मरणेनपदार्थप्राप्त्यनंतरंतत्स्पष्टभावेनशास्त्रातिदेशादितिभावः।

सूत्रे विकारे पशो रनूयाजानामर्थभेदात्तद्वाभेदात्पात्रभेदः स्यादिति ॥ प्रकृ ॥ पूर्वत्र प्राकृतक्रमा
देशेपि नेह तदादरइति संगतिः नन्वेवं नैराकांक्ष्याद्वैकृतानन्वय स्तत्राह तदाकांक्षेति । वैकृतपदा
र्थानां प्रयोजनाकांक्षया पुनर्विकृतेराकांक्षोत्थापनमिति भावः सूत्रे अनुसन्नस्य कर्मणश्शब्दो
षाम्नानासंभवेन वैकृतशेषाम्नानस्योसन्नानंतरभावित्वे प्राकृतेः प्राकृतस्य पूर्वोक्तत्वाद्भसन्नि
धानायामेवान्वयात्पूर्वं वैकृतमंते स्यादिति ॥ ॥कृत॥ प्रयाजापकर्षेतत्पूर्वपदार्थापकर्षवद्वि
देवनाद्यपकर्षः स्यादिति शंकां निराकुर्वन्नाह नत्वेति । अपूर्वोपकृतिः पूर्वः अत्कृतक्रमइतियाव
त्तेन तथात्रापीति अभिषेचनीयाभिषेको मध्यमध्ये प्रत्यक्षपाठस्याभिषेचनीयानंतर्येणुपपत्तस्तातो वि
देवनादीनामभिषेकपूर्वत्वासिद्धेर्न तेषामपकर्षइतिभावः अंतेत्विति अंते नु बादरायणः स्तेषां प्रधा
नशब्दत्वादिति पूर्वाधिकरणगुणानामत्र्यायादित्यर्थः अनेन संगतिः सर्वासंता अपकृतीतिप्रकृति
पूर्वकत्वाभावेन प्रयाजादिवदपकृतित्व क्रममत्ताभावादित्यर्थः ॥ अत्रैवेति विकृतावेवाभिषेका
पकर्षेत्तरकालमनुष्ठानाय क्रमापेक्षायां प्रत्यक्षो न नदेगेस्ते भामिहान्तिदेशिकत्वादेवं चाभि

१ प्रत्यक्षपाठाद्विदेवनादीनामभिषेकपूर्वत्वमेव कल्प्यते । यद्यपि पूर्वपदार्थेनापि प्रत्यक्षः एव पाठस्तथाप्यभिषेचनीयप्रधानेनेवस ×१

शा॰ दी॰ षेचनीयप्रधानविधेस्त्वादेकेन विनापर्यवसानाभावाच्चोदकस्य च प्रधानविधिवाक्यशेषत्वादभिषेचनीया
नंतरपाठोपि तदीयचोदकानंतर्यपर्यवसितत्वादेकस्थानुमानिक इति चोदकाधिगम्याभिषेचनीयप्रा
39 कृतांगोत्तरकालत्वमानुमानिकं न प्रत्यक्षमिति प्रत्यक्षपाठस्यान्यथोपपत्त्यभावाद्विदेवनादीनामभि
षेकपूर्वत्वमेवं वेद्यानुप्रत्यक्षपाठस्य पौर्वापर्यमास्यां चरितार्थत्वान्न तद्बलेनाभावस्यायो वेदेर्हविर्भिवा
सनोत्तरकालत्वमिति विषयं तथा च विदेवनादीनामभिषेकात्पूर्वमेवानुष्ठानमिति तदंतापकर्षः पर्यव
स्यतीत्यर्थः। सूत्रे माहेंद्रस्तोत्रप्रत्यभिषिच्यत इति। कृतदेशादभिषेकात्सर्वेषां विदेवनादीनां समेवा
भिषेकदेश एव देशस्यान्येन प्रत्यक्षसंयोगादितरत्राभिषेचनीयप्राकृतांगोत्तरकालत्वप्रापकं तु न्या
यमात्रमनुमानमात्रं॥ प्राकृ॥ इह प्रत्यक्षोपि पाठो न नियामक इत्युक्त्वा नात्यंगतिः ननु दीक्षणीयां
प्रत्यक्षपाठात्तद्देशत्वे सति तेषां स्वतो देशाभावादर्थाद्गुणिनोपि तद्देशत्वं स्यादत आह गुणानामिति। श्री राम:
ननूत्पत्तिपाठस्यैव क्रमे स्वरूपोपस्थितिपरत्वान्नियामकत्वमित्यतो व्याचष्टे। गुणेति उपस्थापक
त्वमात्रं हि पाठस्य नियामकता यां तेन तत्त्व गुणार्थस्यापि विशिष्टमिति भावः ननु स्वतन्त्रान्याथेनाउ
यादीनामिह प्रत्यक्षपाठादानुमानिकत्वाभावान्न बादरायणन्याय इत्यत आह दीक्षणीयादीति। ननु गुणा x ४

५८

त्यन्निपातः प्रबलश्चोत्कर्षोत्पत्तिस्थानीय इति चोत्कर्षानुसारेण। अयमत एव दीक्षणीपादयं स्युस्तत्रा
ह सा चेति चोत्कर्षपाठस्यानुमानिकत्वादुत्पत्तिस्थानीयस्यापि तस्य बाध्यत्वमेवेत्यर्थः। सूत्रे यद्धेतुत्वं
साहचर्यात्पुरस्तात्पठितेन तस्यापि समदेशत्वं स्यादिति॥ सन्ध्रि॥ ह क्रमेति व्याख्याने शिवेनन्त्रामसज्य कंठधा
रणोपायपदे उरःप्रदेशदाहाभावाय व्यवधानार्थं हृक्ममेतं प्रतिमुंचतीति विहिते सौवर्णाभरण
विशेषधारणे रुक्मप्रतिमोचनशाब्दार्थः संस्कार एकविंशत्याद्भिर्मिलितैः पंचदशत्वात्याधाः पूर्ववत्सं
गतिः ननु पाठादानंतर्यप्रतीतेर्नैष्पष्टाज्ञावमात्रेणानुपपत्तिरतश्चाहानंतरपाठ इति पठनीयांतराभा
वादवर्जनीयतयानंतरपाठ इत्यर्थः। तर्हि सावित्रादिपाठोऽपि तथा स्यादिति चेन्न। तत्र दीक्षणीयाशु
णा नोपठितव्यानां सत्त्वादिति भावः। वैषम्यांतरमाह सावित्रेति। सूत्रे संस्काराणां रुक्मप्रतिमोच
नादेश्च सन्निपातश्चेदं तेनैवोक्तमिति यथोक्तमेव स्यात्॥ ॥इति श्रीचंपकनाथकृतौ शास्त्रदी
पिकाव्याख्याने प्रकाशाख्याने पंचमस्य द्वितीयः पादः॥२॥ ॥विद्वद्धि॥ एवं पादद्वयेन नानाप
दार्थाश्रितः क्रम उक्तः। अस्मिंस्तु पादेऽभ्यामाश्रितः क्रमश्चिंत्यत इति पादांतरत्वं भिन्नपदार्था

शा॰टी॰
४०
40

श्रितत्क्रमापेक्षया श्चाष्टत्रिनिबंधनक्रमस्य सत्स्वन्तामादानं तर्ये चविकृता विति पश्चाद्वन्नौ चेत्यर्थः सर्वे
ति· सर्वेषु संपन्नं शोत्वमस्याः समुदितानां पिनीति यावत्· ननु प्रयोगमपि प्रत्येकमेव किमिति न लक्ष्ये
युस्तत्राह· नेनेति· ननु समुदितैर्लक्षितेप्रयोगे संख्यान्वये समुदितानां एकादशवारं योगः स्यात् किंच
संख्याप्रयोगांगं स्यात् न प्रयाजांगमतश्चाह संख्या चेति एका॰ दशप्रयोगाः कर्तव्या इति नार्थः किं
तु एकादश वारं प्रयाजाः प्रयोक्तव्या इति तथा च प्रयोगद्वारा प्रयाजेष्वेव संख्यान्वयात् प्रोक्तदोष इत्य
मिति भावः। अत्र प्रयाजानामेव प्रयुज्यमानत्वे विशेषणोद्देश्यत्वेपि एकादशत्वसंख्यायाः सहितनिवेशि
त्वस्वाभाव्यात्तिष्वेयस्वभावानुसारेण प्रयाजसाहित्यं विवक्षितमिति सूचयितुमनेकद्रव्यस्वभावेतिसू
त्रे यथा पृषदाज्येनानूयाजानिति पृषदाज्यं प्रत्येकं न तथा एकादशत्वादिसंख्या द्रव्यैरपि न स्वप्रयाजादे
रुपदिश्यते इति सिद्धान्ते तु एषणायाः सहितनिवेशित्वस्वभावाभावात्मैषम्यमिति· स्वस्थ्या। पूर्वपक्षीयवने
न विचारान्तरसंगतिं सूचयितुमाह षडिति· प्रयाजानूयाजानेहोदाहरणं प्रयाजेषु तावद्धोता यक्षदग्निं समि
धां समिद्धमित्यनुवाक्ये प्रायुक्ते प्रयाजार्थाः प्रैषाः पठ्यन्ते तत्र च होता यक्षद्वर्हिः सुष्टरीमोर्णम्रदा इत्ये
सुषमिधा॰

श्री॰एम॰
४०

नदंताः प्राकृतदेवत्याः प्रैषास्तदनंतरं प्रैषे होता यक्षदुस्रा इत्यारभ्य होता यक्षद्वनस्पतिमित्यंताश्च प्रा
कृतदेवत्याः अंतिमस्तु होता यक्षदग्निं स्वाहाज्यस्येत्ययं प्राकृतदेवत्य एवं तदुत्तरानुवाके च समिद्धो अ
द्य मनुषो दुरोण इत्यस्मिन्नप्यनेनैव प्रकारेण पठ्यंते तत्राप्राकृतदेवत्यानामभ्यासेषु विनियोगो वा
क्यः प्राकृतदेवत्यानां लिंगाद्देव प्राकृतेषु पंचस्वपि व्यवस्थितत्वात्तन्नतदेवं सति पर्यायाणामभ्यासः
नदा बर्हिः प्रैषानंतरं पठितानाम प्राकृतदेवत्यानामपकर्षोवत्स्यां तेषां प्रत्यक्षपठक्रमबाधः स्यात्तन्न
स्माच्चतुर्थोत्तमयोरेव षडुत्थ्य प्राकृतदेवत्याः समं स्यादश्रुतत्वादिति न्यायेन समशोंगमिति तयोरेवाभ्यासः
तथान्त्ययाजानामपि देवं बर्हिः सुदेवमित्याद्यनुवाकद्वयगतप्रैषसंप्रैषपाठाद्देवश्चाद्यानां चतुर्णां द
शमस्य च प्रथमानुयाजाभ्यासत्वं पंचमप्रभृत्याद्यमानां द्वितीयाभ्यासत्वं नवमैकादशयोस्तृतीयाभ्या
सत्वमिति निश्चयात् अत उपसद एवोदाहरणं दंडेति श्रेत्रमानेहकृत्स्नं दंडनिवेशात्प्रथममुपसत्त्रयं च
येहकृत्स्नं कृत्वा तस्यैव पश्चादभ्यावर्तनीयमित्यर्थः स्वस्थाने तिस्रः प्रथमामुपसदं कृत्वा पुनः सैवावर्तनी
या एवं द्वितीयान्ततीया चेत्यर्थः सिद्धांतमाह स्वस्थानाविति सर्वेकृतानुपूर्व्यतान्नाप्रकृतोक्तौ स

शा॰री॰ क्रमत्वात्॥ ॥समि॥ ॥अनुब्रूयादिति प्रतिष्ठाकामस्येति वाक्यशेषः। प्राकृतानामेवाभ्यासेन सं
४१ ख्यापूरणे विचाराप्रवृत्तेराह आगमेकृते व्येति दर्शपूर्णमासयोः सामिधेन्य ऋचः एकादश पठिताः
त्रिः प्रथमामन्वाह त्रिरुत्तमामिति विधानात् द्वाभ्यां पञ्चदश संपद्यंते अनुब्रूशिष्टानां षण्णामृचां द्वाशतयो
स्थानामागमेन संख्यापूरणं वक्ष्यते अतो विचारप्रवृत्तिरिति भावः। अथवेति समिध्यमानोऽत्र
ध्वर इत्यस्याः समिद्धो अग्न आहुत इत्यस्याश्च मध्ये सर्वागन्तूनां निवेश इत्यर्थः प्राकृतीनामिति तथा
च पूर्ववदिहापि प्राकृतपाठक्रमस्याबाधोनेति प्रत्यवस्थानात् संगतिः विधानमिति सूक्तेर्विध्य
२५ तं शेषत्वाभावेन सूक्तिनो विधेरवश्यकत्वात्त्वादिति भावः। अत एव आपस्तम्बपक्षस्य उपक्रममात्रमुक्तं
अग्नेन्द्रीते वाजिनेत्यस्या इति सामिधेनीनां पीति शेषः सत्रे धीयमाननयाधाय्यायां समकल्पात् आगंतवः समह
रणात् संख्यावात्॥ सोमा॥ ॥विहृते इति एकविंशेनातिरात्रेण प्रजाकामं याजयेदित्यादि श्रुत्यर्थः समा श्री एमः
गमेन ऋगभ्यासेन वा संख्यापूरणे प्रकृत विचाराप्रसक्तेराह तत्रेति एकं सामेति बहिष्पवमाने सामे ४१
केन सामागमासंभवात् पराकृ बहिष्पवमानेन स्तुवीतेत्यनभ्यासवादि पराक्शब्देन ऋगभ्यासनिषे
ते॰

षात्वृक्तगागमेनैव संख्यापूरणमितिदशमेवक्ष्यत इत्यर्थः। पाठांतरमिदं आगमेनेति प्रकृतौ हि बहि
ष्पवमानस्तोत्रे त्र्यृचस्तृचां स्तोत्रीयानुरूपपर्यासव्यासेषु त्रिषु त्रिवृत्सु च पूर्ध्वगानेन विवृत्तस्तोमो भवति न तु
त्र पंचदश सप्तदश स्तोमादीनामिवावृत्तगानमस्ति स च बहिष्पवमाने विकृतावतिरात्रे चोदकेन प्राप्तः त
त्र त्रिवृत्स्तोमं बाधित्वमेकविंशस्तोमो विहितः। बहिष्पवमाने आवृत्तगानाभावात् त्रिषु त्रिवृत्सु स्थिता
भिर्नवभिर्ऋग्भिरेकविंशस्तोमपूरणाभावात् तत्पूरणाय चत्वारस्तृचा आगमयितव्या ऋगागमनेनोप
९६ दिष्टा इष्यत इत्यर्थः ननु द्वादशाहे आम्नायते स्तोत्रीयानुरूपो तु चौ भवतः। तृच एवं न स्तृचा भवंति तत्र
मः पर्यास इति अयमर्थः प्राकृतानां बहिष्पवमानगतानां तृचानां स्तोत्रीयोनुरूपः पर्यास श्चेति त्रीणि
नामानि तत्र चोदकप्राप्तयोरनुरूपपर्यासयोस्तृचयोर्मध्ये तृच एव छिद्यते कः स्तृचाः कर्तव्या इति अतो
द्वादशाहे तृच एव तत्पर्यासप्राप्त्याभावस्य वाचनिकत्वात् पाठेन प्राप्तिकथनमयुक्तमित्याशंकानेदं वचनं वि
धायकं किं तु पाठप्राप्त्यानुवादेन श्लोकं व्याचष्टे द्वादशाह इति विवृद्धे इति पंचदशस्तोमक इत्यर्थः पूर्वत्र
व्याख्याशब्देन द्विहपर्यासशब्दो स्तीति संगतिं सूचयन्नयुक्तोत्तरमाह पर्यासशब्दे इति। प्रकृतावेवेति। अन्य

इत्याशये २

शा०दी० ४२ यानुरूपपर्यासयोः प्रकृतिवत्प्रसंबाधप्रसंगादिति भावः॥ अथे॥ विहृद्वेति॥ पूर्वोदाहृते नैषेवेत्यर्थः॥ वस्तुत
इति ज्यतिरात्रेहि माध्यंदिनार्भपवमानयोष्वोदकत्राशैपंचदशसप्तदशस्तोमौ बाधितुमेकविंशादिविहृ
दस्तोमो वचनादनुष्ठीयते तत्र बहिष्पवमानवदुद्गागमनेन भवति किं तु सामागमेन स्तोमपूरणमिति व
क्तत इत्यर्थः॥ पूर्ववदंते निवेशश्च इति संगतिः॥ अंत इति पठितानां नवानां मध्ये चरमतश्चैव गानमित्यर्थः॥ त्री
णि ह वै इत्यस्यायमर्थः स्तोमस्य विहृद्ध्ये साम्नश्चावापः क्रियते ह्रासाय चोद्वापः तावुभौ गायत्र्या
दिष्वेव नान्यत्रेति उच्चा ते जातमंधस इत्येष माध्यंदिनपवमानस्याद्यस्तृचः स्वाधिष्ठेयते पश्चाभ
वपवमानस्यांतावुभौ गायत्रीछंदस्कौ तयोरावापो न तु त्रिष्टुप्जगतीछंदस्कयोरंत्ययोस्तृचयोरि
ति सिद्धांतिशंकां परिहरति नत्विति॥ आविधीति वर्तमानानिर्देशादित्यर्थः॥ अनारभ्येति॥ प्राभाकरो
क्ते द्वादशाहप्रकरणास्थत्वं तत्र रत्ने दूषितमिति भावः सति वचने पूर्वपक्षाभावादाह यथेति॥ अथे॥
त्रीणि ह वा इत्यस्य विधित्वेऽपि यां वैकां च नेत्यस्याविधित्वासंभवाच्छ्रोत्रगणादीनामंतिमचितिनिवेश इति॥ श्रीरामः
पूर्वसंगत्या प्रवृत्तेऽपि ष्यमाणाग्निमाधिकरणोपोद्घातत्वादस्य संगतिः आरभ्याधीतत्वे यत्रैवाध्ययनं ४२

42

तत्रैव सह इत्यनुष्ठाननिमित्तप्रकृत्येपि वक्ष्यमाणत्वानुष्ठानविशेषासिद्धेराह अनारभ्येति। प्रतिविनीतमित्रति
प्रस्तारंस्तत्रैवोपात्तवाक्यभेदेनानुवादमात्रत्वात्। अंते। अत्रमायांपंच व्याचिनो। क्रमेतिपाठादिनेतिशेषः।
अव्यवायः व्यावधानाभावः पठितेनेति। इष्टकाभिरग्निंचिन्वीत इत्यादिनेत्यर्थः। कल्पितेनेति। लिंगादि
कल्पित श्रुतिरूपेणेत्यर्थः। जानातीति। इति अपि सर्वस्य जानाते : अत्यन्तरूढिरित्याऊः। वाक्ये चेति एवं
चवाक्यार्थत्वात्प्रत्यक्षश्रुतिलिंगकब्राह्मणपरत्वमेव वाच्यमिति भावः।। शास्त्रलोकं।। एवंपिजीवने
नदेशविशेषविचारात्संगतिरिति सूचयति स्थितमिति तत्रेति। लोकेष्टकापात्राग्निप्रकरणस्नातत्वे
न प्राकरणिकेष्टकानां नैः क्रमप्रकमत्वान्नदृबाधार्थेलोकेष्टकानां तत्रचित्रिण्णादयस्सुरित्यर्थः। ननु लो
केष्टकायाः प्रकरणार्थत्वे न चित्यं तत्रैतावकाशं न स्यात् अपि पदेवास्यानमितिप्रसंगब्राह्मण एवं तेन मध्य
मचितिविषयत्वात्तत्राह नहीति तत्र ब्राह्मणेन मंत्रमात्रविधानादित्यर्थः। ननु न क्षिद्रिष्टकायाः स्व
शीरुपदधातीत्यत्र मंत्रस्यैव विधिर्नेष्टकानामिति पक्षांतरमुक्तो मंत्रस्य प्रत्यक्षब्राह्मणविधान
मात्रेणतन्मंत्रोपधेयेष्टकानां मध्यमचितिसंबंधः स्वीकृतइतिचेत्सत्यं न मंत्रविधानमात्रेण तत्र

शा०टी० ४३

43

किंतु अत्र लक्षणाज्ञाणेतन्मंत्रोपधेयतया इष्टकानां निर्देशेनापि भवितव्यं न च चित्रिएया हीनाय मस्ति
तद्धानासामिति व्याकरणास्मरणान्न तु लोकंश्रणाया इति भावः कल्पमिति इष्टकाभिरग्निं चि
नुत इति तु सामान्यविधिः न प्रातिस्विकविधिरिति भावः अविशेषेति चिति मात्रेत्यर्थः वचन
स्येति यदेवास्येति वचने मंत्रमात्रविधानेऽपि मंत्रस्योपधानकरणत्वान्यथानुपपत्तेर्वेष्टकालाभा
दिति भावः संकोचश्चिंसंतरविषयत्वं। संस्कृ॥ प्रकरणार्थत्ववचनादागंतूनां लोकंश्रणानंतर्येपि इ
हवचनाभावात्पवमानहविरानंतर्यमिति संगतिः आधानादिति आधानादनंतरमित्यर्थः प्रथ
मे भाष्यकारमते सिद्धांतमाह निरपेक्षमिति आधानोत्तरकाल इति विकल्पे तदसंभवादिति भावः
वार्तिककारमतसिद्धांतमाह यदापीति सूत्रे पवमानेष्टि संस्कृते त्रेगो अग्निहोत्रादिकमे आहवनीय
शब्दस्य संस्कारवाचित्वात् पवमानसंस्काराणामप्यग्निहोत्रार्थत्वात्॥ संचि॥ आहितेति यथाहा
हिताग्निर्नेक्षिन्न दार्वभ्यादध्यादित्याहिताग्निवचनान्याधानानंतरमेव प्रवर्तेतेन हृदित्यर्थः। अनंत
रं त्वनंतनङ्कृतत्वादिति पूर्वोधिकरणगुणसूत्रे ५८ अग्निहोत्रादिवैषम्येण आधानानंतरं कर्तव्यत्वमा

श्रीए० ४३

नाग्निव्रतस्योक्तं तदृष्टांतेन भ्रातृव्यस्यानात्मसंगतिः। चयनस्वरूपनिष्पत्तिः चयनकर्मिकाभावनाभू
तेतिकर्माणिभूतेभ्यि इति चाधिकृत्यश्चाग्नेरिति श्च ग्राबुपपदेविनोते धर्मोभ्रं तेक्ति प्रत्ययविधाना
द्दितिभावः। अग्न्युपकार इति स्वरूपस्य प्रागेवसिद्धत्वादितिभावः आधानस्यतु चयनवत्क्रत्वर्थ
त्वाभावेन क्रतुपूर्वसाधनसंस्कारत्वाभावान्न स्वतंत्रमेवाग्निगतमदृष्टं फलमितिनाहिताग्निव्रते
पुक्तत्वेन तद्वत्ती ह्येत्याह आधानस्येति सूत्रे अग्निचित्प्रयुक्तंव्रतं संचितमात्र एव स्यान्निमित्तस्य
प्राग्ने॥ ५२॥ सर्वेषामिति इष्याद्दीक्षिष्यमाण इतिसमभिव्याहारेण दंडादीनां तृतीययाच दीक्षा
र्थत्वादित्यर्थः अदृष्टार्थानामिति दृष्टार्थत्वे हि व्रीहियववद्विकल्पास्यादितिभावः सर्वांत इति श्च
नेन यथान चयनमात्रादग्निचित्वमेवमिष्टमात्रान्न दीक्षितत्वमिति संगतिः ननु दीक्षिष्यमाण इ
तिशानचा कर्तुरभिधानात्पुरुषसंस्कारार्थैवेष्टिर्न दीक्षार्थेत्याशंक्यपुरुषसंस्कारद्वारैव दीक्षार्थेत्या
शयेन व्याचष्टे दीक्षिष्यमाण इति इष्टिजन्यसंस्कारातिरिक्तादीक्षैव नास्तीतितटस्थशंकां वारय
ति दीक्षा चेति परिग्रहः परिग्रहानुकूलव्यापार इत्यर्थः सिद्धांते प्रयोजनमाह इष्यंत इति अनेन प्र

शा॰दी॰ वेपक्षे प्रयोजनं सर्वानेदीक्षितधर्मो इति सत्यचिते सत्त्वे सर्वे शिष्टिं इत्यादिभिर्दीक्षाभिसंबंधाद्दोषेदनासरी
५५ णावदानानेतरे हीक्षितैः स्यात्॥ अंग॥ दीक्षितधर्माणां दीक्षारूपधर्मनिमित्तानंतर्यं नियमेऽपि काम्या
नां नैमित्तिकानां च काम्यानां नैमित्तिकानंतर्यनियमो नो नास्तीत्युत्थानात्संगतिः॥ पुण॥ एतच्छास्त्रार्थ
विचारस्य पूर्वोपवादत्वाद्व्यवस्थापनपर्यवसानात्संगतिमभिप्रेत्याह क्रत्वंतराणामिति सिद्धांते मा
ह अग्निष्टोमस्त्विति नन्वग्निष्टोमसंस्थाकत्वेऽपि यागस्य करणत्ववदन्यसंस्थाकत्वेऽपि करणत्वं
किं न स्यात्तत्राह नचेसंस्थानामिति इतिकर्तव्यतायुक्तस्य करणत्वाद्यत्संस्था इतिकर्तव्यतांत
र्गतात्संस्थस्यैव करणनिर्देशग्रहणं न्याय्यमिति भावः सूत्रे प्रकरणात्तस्यैव प्रकरणित्वात्तद
वस्था॥ पूर्वोपजीवनात्संगतिमभिप्रेत्याह एतद्धिति प्रकृताः सन्निहिता इत्यर्थः प्रकृतादितरध
त्सन्निहितं न तस्मादुच्चित्वादन्यशब्दस्येति भावः सन्निधानस्य वक्ष्यमाणरीत्या सर्वसाधारण्यात्व श्रीरामः
याप्रकरणमेव वाच्यं न च तदस्तीत्याह नत्विति यदुक्तं सन्निधानादुक्थ्यादीनामेव ग्रहणमिति ५५
तत्राह वाक्यशेष इति एष वाव प्रथमो यज्ञो यज्ञानामित्यादौ यज्ञानामिति शब्देन क्रत्वंतराणामपि

कीर्तनेन तत्साधारण्यं सन्निधिरित्यर्थः अत्राचार्यैरग्निष्टोमे यत्सातरेभ्यः प्राथम्यं विधीयत इति प्रा
प्तं तस्मादेतेनेष्ट्वान्येन यजेतेति यजिपरप्रत्ययेनैतच्छब्दार्थाग्निष्टोमे प्राथम्यविधौ अत्र तेनैवाक्यस्या
यज्ञान्तराणामग्निष्टोमोत्तरकालविधौ तु श्रुत्यनुग्रह इति स्वाध्ययनानन्तरं क्रतौ तदिममर्थमाह सर्वेषा
मिति। एक॥ योवाइति। योवै त्रिवृद्धादशस्तोमः प्रकृतोऽग्निष्टोमादन्यं यज्ञक्रतुं प्राप्नोति स तेहीषय
तीति त्रिवृद्धादेर्हि एकत्वोक्तेः कृत्स्नः व्याप्तिं विना ह्येकत्वासंभवात्त्रिवृद्धादेः कृत्स्नव्याप्त्यवगमाद्वा
क्यशेषे एकस्तोमकानामेव क्रतूनां निर्देश इति भावः। सिद्धान्तमाह तत्त्वेवमिति सूत्रे क्रतुसंयोगा
देकस्यैव त्रिवृदादेः वाक्यशेषे क्रतुसंयोगात्॥ ॥ इति श्रीचंपकनाथकृतौ शास्त्रदीपिकाव्याख्या
ने प्रकाशाख्याने पंचमस्य तृतीयः पादः॥३॥ ॥कम्॥ ॥ इह क्रत्वादिप्रमाणानां बलाबलं
चिन्त्यते पूर्वं तु क्वचिद्विचारः प्रसंगात्। अतः पादान्तरत्वमानन्तर्यं च किमिति श्रुत्यर्थयोस्तु न कुत्रापि
विरोधः श्रुत्यनुरोधेनैव प्रयोजनस्य कल्प्यत्वादिति ध्येयं किमाश्विनस्येति किं तृतीयस्थानेपि ग्रहणा
मुत दशम एवेत्यर्थः अनर्थकमिति यवाग्वानर्थक्येन तस्याकस्मान्नर्थक्यमेवेति भावः सूत्रे प्रयोजन

शा०दी० श्रुतिभ्यां पाठक्रमस्य बाधः श्रौतक्रमस्य मुख्यत्वाद्बलवत्त्वं गौणकल्पनया पाठक्रमाद्विशेषसद्भावा
४५ त्सर्वस्य प्रयोजनार्थत्वाच्च ॥ अव ॥ श्रुत्यर्थपाठानां मुख्यत्वात्तदनन्तरं जघन्यप्रमाणबलाबल
चिन्तनात्संगतिः सान्नाय्यधर्माः शाखाहरणादयः आग्नेयधर्मा निर्वापादयः प्रधानं त्विति पाठ
45 क्रमादिति भावः प्रथममग्निर्याहि हि मुख्यक्रमस्तदा प्रथमं शाखाहरणादयस्ततो निर्वापादयस्तदन
न्तरमाग्नेयासादनं ततः सान्नाय्यासादनं ततः कश्चिदाग्नेयधर्मस्ततः सान्नाय्यधर्म इत्येवं प्रधानप
र्यन्ता धर्माः तदनन्तरमाग्नेययागः ततः सान्नाय्ययागः तत्र प्रथममनुष्ठिताये शाखाहरणादयस्ते
षामेवं परं स्वप्रधानेन सान्नाय्ययागेन आग्नेयसहितत्वात्स्वानुमते कैकोऽग्नेयधर्मक्षणाधि
कक्षणो विप्रकर्षो भवतीति निर्वापाद्यनन्तरमाग्नेयासादनस्याधिकप्रवेशादिकेरत्वासादनादयः परे
फरतु च्छेयाः सर्वेपि स्वप्रधानेन सान्नाय्ययागेन संनिहिता भवन्ति मध्ये आग्नेयधर्मपदार्थैर्द श्रीरामः
यसमावेशाभावेन शास्त्रानुमतविप्रकर्षाभावाद्व्युत्क्रमादरे तु प्रथमं शाखाहरणादय ४५
स्ततः सान्नाय्यासादनं ततः आग्नेयासादनं ततः सान्नाय्यधर्मः कश्चित्तत आग्नेयधर्म इत्येवं प्रधा

नपर्यंताधर्मास्तत आग्नेययागकृत तस्मात्सान्नाय्ययागस्तत्र सर्वे सान्नाय्यधर्माः स्वप्रधानेन सान्ना
य्ययागेन विप्रकृष्टा भवंतीति अंतिमसान्नाय्यधर्मानंतरमाग्नेयौपांतिमधर्मस्याग्नेयप्रधानस्य च
प्रवेशेन शास्त्रानुमतक्षणांतरव्यवधानस्यावर्जनीयत्वादित्यर्थः प्रथमेकातिपयेपदार्थाइति
वक्तव्येऽत्र तत्कालीयस्वधोननापेक्षवचनं प्रधानानंतरभाविषु तु स्विष्टकृदवदानादिषु प्रवृत्तिक
माहेसान्नाय्ययागानंतरं तदीयहविः स्विष्टकृदवदानेन तेनाग्नेयस्य तथा च सान्नाय्ययागस्य
तदीयस्विष्टकृदवदानस्य च तेनैतर्पौदाग्नेयधर्माणां स्विष्टकृदवदानादीनां सर्वेषां उत्तरेषां स्व
प्रधानेनाग्नेयेनासंनेविप्रकर्षः स्यादिति द्रष्टव्यं न चेति अवदानमभिधारणस्याप्युपलक्षणं पूर्व
मेवावदानादेः प्रदानांतसैकपदार्थत्वसाधनेन प्रधानावदानस्य प्रधानाभिधारणस्यापि प्रधा
नात्प्रयक्रमावासंभवेन नत्र विचारयोगादित्युक्तमित्यर्थः ॥ वृ ॥ वचनादिति एवं चात्रैवावनि
कक्रमस्य नकेनापि बाधइतिसंगतिः आनंतर्यलक्षणायां वक्ष्यमाण इति विशेषणमेव बीजमि
त्युपपादयति सर्वेष्वेति ॥ उक्त ॥ पूर्वत्राविशेषचिंतनात्संगतिंसूचयति । स्थितइति आग्नेयइति अ

मेब्राह्मणस्य च एक ब्रजापति मुख जन्यत्व श्रुते ब्राह्मणोग्निदेवतः स सोमयागानंतरमाग्नीषो
मदेवतलस्मात् यत्न पौर्णमासं हविः तदृदः नाहि सोमाद्दूर्ध्वमत्र निर्वपेन्ननतः प्रागित्यर्थः द्वितीय
पक्षेपि ब्राह्मणस्यापि कल्पदृयाविरोधाद्राह सिद्धांत्येकदेशीति पौर्णमासी धर्मक मित्रि मासाग्नि
होत्रभ्य अग्निशाद्दैवतो पौर्णमास शब्दो धर्मलक्षक इति भावः एकदेशिनं पूर्वपक्षोप्रतिक्षिपति न त्विति
विशिष्टेति अग्नीषोमदैवतया पौर्णमासपद लक्षितधर्मैः स्वविशिष्टस्य संज्ञापक्षे चोदनालिंगोप
स्थितधर्मविशिष्टस्य च कर्मणो विधेरित्यर्थः पूर्वेति यथा प्रकरणात् पौर्णमास्याः कालविधिस्त
था प्रकरणादाधानस्यैव ऋतु नक्षत्राद्यतिरिक्त मविधिरिति पूर्वोपजीवनेन पूर्वपक्ष सोक यीदि
त्यर्थः नर्तुनि तिक्रान्त्याद्रियते त्यर्थः पदहरेवैनं प्रज्ञोपनमेन्न दहरेवादधीतेत्यनेनेत्यर्थः सोमका
लबाध एवेति आधानकालबाधफलत्वे निष्फलहिरुक्तिदोष इति भावः नन्वेवं सोमकालबाधोपि
शात पद्योन्नयाद्दिरुक्त स्यादिति शंकते यद्यपीति शाखाभेदान्नैवमिति परिहरति तथापीति अस्या
मिति यस्यामृत्वा घनादरकू चनं तस्यामित्यर्थः अविहितः सोमकालबाध इति शेषः नत्परः सो

मविषयः अयमिति सोमेनेत्यादिवाक्योक्तकालबाध इत्यर्थः इह सोमेन वक्ष्यमाण इति विशेषणा
द्वचनादिष्टिपूर्वत्वमित्यधिकरणोक्तरीत्या पूर्वाधानानंतर्ये प्राप्ते तद्युक्तस्य सोमस्यापकृष्टत्वाद्घना
दरेण सोममात्रस्य तथात्वं च वसंतादिविधिशिष्टिपूर्वत्वेऽपर्यवसितइत्याह सोमेनाधानानंतरमिति स्थि
तादिति मूलचिंता हि पूर्वपक्षावसाने स्थितातत्तदनंतरं तद्बुद्धव्यत इत्यर्थः सिद्धांते सकदेशी पक्षप
क्षांतरोपवर्णनमुखेन पूर्वपक्षं निराहनन्हत्वेति विरहितात् विभक्तादवयवशः कृतादिति याव
त्परामृष्टमिति स सोमेनेष्ट्वाग्नीषोमीभवतीति प्रकृतत्वादिति भावः सत्रे ब्राह्मणस्य त्रय
मे सोमः स्यात् कृत्स्नदर्शपौर्णमासोत्कर्षात्॥पुरो॥ एकहविरुत्कर्षइत्यप्रक्रमित्युत्थानात्स्व
गतिः विष्विति। उपांशुयाजेनपौरपि वैकल्पिकदेवतात्वादिति भावः सत्रे विशिष्यानि दर्शपुरो
डाश एव स्यात् तद्युक्ते हवि र्युक्ते स्वोद्देशेन हविस्त्यागाहेषु रूपेष्वग्नीषोमयोर्देवतात्वात्॥ विकृ।वि
कृतयः दर्शपौर्णमासविकृतयः वचनविरोधः पदश्येत्यादिवचनविरोधः वचनांतरेति पूर्वेष्वपि
होतिरुत्तरेषु दैवतायज्ञतोमि वचनादित्यर्थः एकस्या इति विकृतेरित्यर्थः एवं च वचनस्य पूर्वत्र त्वा

शा॰टी॰ ५७

57

ज्योत्कर्षो सामर्थ्यो हविःसद्यस्कालतायामपि स्वसामर्थ्यमित्युत्थानात्संगतिः पंचदश्याममावा
स्यायां पौर्णमास्यां वा सूत्रे विहितेः प्रकृतितः प्राप्तस्य सहकालतासोदकबाधे नोत्तरान्न हि कृतिः स
घस्कालास्यात् प्रकृतौ तयोर्द्धिकालत्वपर्वकालत्वयोः प्रत्यक्षविशिष्टत्वादुभयसंगीकृतौ इह
लोके स्यानुमानिकत्वाद्बाध एव।। सान्नाय्य।। तद्विकाराणामिति सान्नाय्यविकाराणां यः पाप्तो
गृहीतः स्यात्तस्माएतामैंद्रावरुणीं पयस्यां निर्वपेदित्यादिनांत्र अग्नीषोमीयविकाराणामग्नीषोमी
यमेकादशकपालं निर्वपेत् हसंतेव्र ह्लावर्यसकामइत्यादीनां चेत्यर्थः।। तथा।। अतइति न च सान्ना
य्यस्यापितद्दुसमेव न येदिति वचनात्सोमात् प्रागभावोप्यस्तीति सान्नाय्यविकाराणामपि सोमो
त्तरकालत्वं प्रबोधिकरणोक्तं न स्यादिति वाच्यं सान्नाय्यस्य सोमात्प्रागभावो नास्तीति सान्नाय्य
विकाराणामपि सोमोत्तरकालत्वं प्रबोधिकरणोक्तं न स्यादिति वाच्यं सान्नाय्यस्य सोमात्प्रा
गभावो नास्तीति कृत्वाचिंतया प्रबोधिकरणप्रवर्तनादेवं च पूर्वेवैषम्येणोत्थानात्संगतिः अर्थ
त इति तच्छ्रार्थिकत्वान्न न स्यादितिदेश इति भावः नन्वेवमपि प्रकृतौ वाचनिकस्याधानानंतर्यस्य

श्री रामः ५७

शा-दी-
४८

४९

विकृतिष्वतिदेशात्प्रकृतिवद्विकृती नामप्यार्थिकमिष्टेः आगन्तुष्वानमस्ति सत आहाधानानं
नरत्वमिति द्वयोरप्यतिदेशमात्रं छित्तेन व्यपेधानेन द्वितीयस्याधानानन्तर्यविधानादिति भावः स
त्रेयथा सान्नाय्यादिविकाराः सोमाङ्गं तथा सोमविहारादर्शपूर्णमासाभ्यां मुख्यं सुः॥ ॥
इति श्रीचंपकनाथकृतौ शास्त्रदीपिकाव्याख्याने प्रकाशाख्याने पंचमस्याध्यायस्य च
तुर्थः पादः॥४॥ ॥ पंचमअध्यायः समाप्तम्॥ ॥ श्रीगुरुभ्यो नमः॥ ॥ ॥

श्रीरामः
४८

[illegible]

४८

[illegible]

इ। ४। ५। प्रकाशशास्त्रदीपिकाटीका

चतुर्थपञ्चमाध्यायौ